दाखल क्र M२९३ विषय काव्य

नाव. माघकाव्य. (शिशुपालवधम्) (२सर्ग) मुद्रित

लेखक/लिपीकार माघकवि

पृष्ठ ४८ काळ शके 1792 पूर्ण/अपूर्ण

॥ अथमाघकाव्ये द्वितीयसर्गप्रारंभः ॥

श्रीगणेशायनमः अथास्मिन्सर्गेमंत्रवर्णनायबीजमावपति यियक्षमाणेनेति अथेंऽस्संदेशश्रवणानंतरं यियक्षमाणेनयष्टुमिछता यजेःसन्नंता
ल्लटःशानजादेशः पार्थेनपृथापुत्रेणयुधिष्ठिरेण तस्येदमित्यण् अन्यथास्त्रीभ्योढकृस्यात् आहूतः आकारितः ह्वयतेःकर्मणिक्तः संप्रसारणदी
र्घौ तथा अभिचैद्यं शिशुपालंप्रति लक्षणेनाभिप्रती आभिमुख्यइत्यव्ययीभावः अभिरभागइतिकर्मप्रवचनीयत्वे तद्योगेद्वितीयावाप्रतिष्ठासुः
प्रस्थातुमिछुः तिष्ठतेःसन्नंतादुप्रत्ययः मुरंद्विषन्मुरारिः द्विषोमित्रइतिशतृप्रत्ययः नलोकेत्यत्रद्विषःशत्रुर्वावचनमितिवैकल्पिकःषष्ठीप्रतिषेधः

यियक्षमाणेनाहूतःपार्थेनाथद्विषन्मुरं अभिचैद्यंप्रतिष्ठासुरासीत्कार्यद्वयाकुलः १
गुरुकाव्यानुगांबिभ्रच्चांद्रीमभिनभःश्रियं सार्द्धमुद्धवसीरिभ्यामथासावासदत्सदः २

कार्यद्वयेन क्रूरकार्यकृत्यकार्यरूपेणाकुलोविप्रतिषेधादावश्यकत्वाच्चद्वयोःसंदिहानआसीत् अतोमंत्रस्यायमवसरइतिभावः १ एवंमंत्रबीजंसंदेह
मुपन्यस्यमंत्रोचितंदेशमाह गुरुकाव्येति अथसंदेहानंतरं असौहरिःअभिनभः आकाशंप्रतिपूर्ववदव्ययीभावः कर्मप्रवचनीययुक्तेद्वितीयावा गुरुका-
व्यौबृहस्पतिशुक्रौअनुगावनुयायिनौयस्यांतां गीष्पतिर्धिषणोगुरुः शुक्रोदैत्यगुरुःकाव्यइत्यमरः चंद्रस्येमांचांद्रींश्रियंबिभ्रत् अत्रश्रीतुल्यांश्रियमिति-
निदर्शनाभेदः उद्धवसीरिभ्यांसार्द्धंउद्धवबलरामाभ्यांसहसदःसभामासदत् आगमत् सदसःप्रासादत्वादितिभावः सदेर्लुङि पुषादित्वाच्च्लेरङादेशः अत्रमनुः

गिरिपृष्ठंसमारुह्यप्रासादंवारहोगतः अरण्येनिःशलाकेवामंत्रयेदनावभावितमिति २ जाज्वल्यमानेति जगतःशांतयेनिरुपद्रवायसमुपेयुषीमिलिनाजा-
ज्वल्यमानाभृशंज्वलंती धातोरेकाचोहलादेःक्रियासमभिहारेयङ् ततोलटःशानजादेशःटाप् असौनराःपुरुषाएवशिखिनोग्रयस्तेषांत्रयी द्वित्रिभ्यांतय
स्यायजादेशे टिड्ढाणञित्यादिनाङीप् सभा आस्थानीसैववेदिःवेदिःपरिष्कृताभूमिरित्यमरः तस्यांव्यद्योतिष्टदीप्यतेस्म द्युद्भ्योलुङीतिपरस्मैपदाभा
वपक्षेलुङ् रूपकालंकारः ३ रत्नेति रत्नानांस्तंभाः इतिषष्ठीसमासः विशेषपर्यवसानात् विकारार्थत्वं तेषुसंक्रांतप्रतिमाः संक्रांतप्रतिबिंबाः प्र-

जाज्वल्यमानाजगतःशांतयेसमुपेयुषी व्यद्योतिष्टसभावेद्यामसौनरशिखित्रयी ३
रत्नस्तंभेषुसंक्रांतप्रतिमास्तेचकाशिरे एकाकिनोपिपरितःपौरुषेयवृताइव ४

तिमानंप्रतिबिंबंप्रतिमाप्रतियाननेत्यमरः तेत्रयएकाकिनोऽसहायाअपि एकाकिनिश्चासहायेइत्याकिनिच्प्रत्ययः परितोभितःसर्वतः पर्यभिभ्यांचेति
तसिल्प्रत्ययः सचसर्वोभयार्थेवर्तमानाभ्यामिष्यतइत्युक्तंभाष्ये पौरुषेयेणप्रतिबिंबभूयस्त्वात् पुरुषसमूहेनवृताइवेत्युत्प्रेक्षा चकाशिरे पुरुषाद्व
धविकारसमूहतेनकृतेष्विनिवक्तव्यमितिढञ्प्रत्ययः एतेनविजनत्वंउक्तं यद्यपिनिस्तंभेनिर्गवाक्षेचनिर्भित्यंतरसंश्रये प्रासादाग्रेत्वरण्येवामंत्रयेदना
वभावितमितिकामंदके मंत्रभूमेःस्तंभप्राचुर्यनिषेधोदृश्यतेतथाऽपितस्यापिविजनोपलक्षणत्वाददोषइतिभावः ४

 अध्यासामासुरिति अमीत्रयोयान्युत्तुंगहेमपीठानि अध्यासामासुरधितष्ठुःयेषुउपविष्टाइत्यर्थः अधीशीङ्स्थासांकर्मेतिकर्मत्वं आसउपवेशनेलिट् दयाया
सश्चेत्याम्प्रत्ययः कृञ्चानुप्रयुज्यतेलिटीत्यस्तेरनुप्रयोगः आम्प्रत्ययवत्कृञोनुप्रयोगस्येति कृञ एवेतिनियमादस्तेर्नात्मनेपदं तैः पीठैः केसरीभिःसिंहैः
क्रांतानांत्रिकूटस्यत्रिकूटाद्रेः शिखराणांमुपमासा दृश्यमूहेऊढा वहेः कर्मणिलिट्संप्रसारणं त्रीणिकूटानि अस्येति अन्वर्थसंज्ञा कूटोस्त्रीशिखरंशृंगमित्य
मरः उपमालंकारः ५ गुर्विति अथोपवेशनानंतरंविचष्टइतिविचक्षणःवक्ता कर्त्तरिल्युडितिन्यासकारः असनयोश्चप्रतिषेधोवक्तव्यइतिचक्षिङःख्याञा

अध्यासामासुरुत्तुंगहेमपीठानियान्यमी तैरूहेकेसरिक्रांतत्रिकूटशिखरोपमा ५ गुरुद्वयायगुर्वोरुभयोरर्थ
कार्ययोः हरिर्विप्रतिषेधंतमाचचक्षेविचक्षणः ६ द्योतितांतःसभैःकुंदकुड्मलाग्रदतःस्मितैः स्नपितेवाभवत्तस्य
शुद्धवर्णासरस्वती ७

देशाभावः हरिःगुर्वोःउद्धवरामयोःपितृव्यभ्रातृभ्रात्रोःद्वयायद्वाभ्यामित्यर्थः गुरुणोर्महतोरुभयोः कार्ययोः पूर्वो
क्तयोः तंविप्रतिषेधंविरोधमाचचक्षे आख्यातवान् तुल्यबलविरोधोविप्रतिषेधः ६ द्योतितेति कुंदंमाघभवःपुष्पविशेषः माध्यंकुंदं रक्तकस्तुइत्यमरः तस्यकु
ड्मलाग्राणीवदंतायस्यसः तस्यकुंदकुड्मलाग्रदतः अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्चेति अग्रांतपूर्वपदबहुव्रीहिः समासांतोवैभाषिकोदत्रादेशः तस्यहरेःसरस्वती
अंतःप्रधानासभाअंतःसभासभाभ्यंतरमित्यर्थः सद्योतिताप्रकाशितायैस्तैःस्मितैःस्नपितेवक्षालितेव स्नातेर्ण्यंतात्क्तः अर्तिह्रीत्यादिनापुगागमः मितांह्र- २
स्वः शुद्धवर्णास्फुटाक्षरास्वच्छकांतिश्चाभवत् स्वाभाविक्यावर्णशुद्धैःस्नानहेतुकत्वमुत्प्रेक्षते स्मितपूर्वाभिभाषीहरिरितिभावः ७

कार्यविप्रतिषेधं निवेद्य तत्र स्वमतमावेदयिष्यन् पंडितमानित्वं तावत्परिहरति भवद्भिरामिति भवद्भिरां युष्मद्वाचां अवसरप्रदानाय प्रसंजनायेत्यर्थः प्रवर्तनायेति यावत् नो
स्माकं वचांसि सिद्धांतभावनार्थमुच्यंते न तु सिद्धांतत्वेनेत्यर्थः तथाहि पूर्वं रज्यंते जना अस्मिन्निति पूर्वरंगः नाट्यशालातत्स्थकर्मापि पूर्वरंग इति दशरूपके अतः पूर्वरंगो
नाम रंगप्रसाधनाख्यो रंगविघ्नशांतिकारी नांदीपाठगीतवादित्राद्यनेकांगविशिष्टो नाट्यादौ कर्तव्यः कर्मविशेषः तदुक्तं वसंतराजीये यन्नाट्यवस्तुनः पूर्वं रंगविघ्नोपशां
तये कुशीलवाः प्रकुर्वंति पूर्वरंगः प्रकीर्तित इति स पूर्वरंगः नाटके भवं नाटकीयं तत्र वर्ण्यमित्यर्थः दृष्टांतः तस्य वस्तुनः इतिवृत्तस्य प्रसंगाय प्रसंजनाय प्रवर्तनायेति
यावत् अतः प्रथमवादो न दोषायेति भावः पूर्वरंगः प्रस्तावनेति रंगराजः तच्चिंत्यं पूर्वरंगं विधायादौ सूत्रधारे विनिर्गते प्रविश्य तद्वदपरः काव्यमास्थापयन्नटः प्रथमं पूर्वरंग

भवद्भिरामवसरप्रदानाय वचांसि नः पूर्वरंगप्रसंगाय नाटकीयस्य वस्तुनः ८ करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशां विनाप्य
स्मदलंभूष्णुरिज्यायै तपसः सुतः ९

अततः प्रस्तावनेति च आरंभे सर्वनाट्यानामेतत्सामान्यमिष्यते इति दशरूपकाद्युक्तभेदविरोधादिति अत्र हरिवा
क्यपूर्वरंगयोः प्रसंजनकत्वरूपसामान्यस्य वाक्यद्वये शब्दांतरेण पृथङ्निर्देशात् प्रतिवस्तूपमालंकारः लक्षणं तूक्तं ८ संप्रति स्वमतमाह करदीकृतेति दिशां जित्वरै
र्जयनशीलैः इण्नशजिसर्तिभ्यः क्वरप् कृद्योगात्कर्मणि षष्ठी भ्रातृभिः भीमादिभिः हेतुभिः करदाः षष्ठभागप्रदाः भागधेयो बलिः कर इत्यमरः ततः च्विः ऊर्यादिच्विडाच
श्चेति गतिसंज्ञायां कुगतिप्रादय इति नित्यसमासः अकरदाः करदाः संपद्यमानाः कृताः करदीकृताः भूपालाः येन सः वशीकृतराजमंडलः तपसः सुतः धर्मपुत्रः तपश्चांद्रा

टी० यणादौस्याद्धर्मेलोकांतरेपिचेतिविश्वः अस्मद्विनास्माभिर्विनापीत्यर्थः पृथग्विनेत्यादिनातृतीयाविकल्पात्पंचमी इज्यायैयागाय यजयजोर्भाविक्यप् वचिस्वपीत्यादिनासंप्रसारणं सर्ग.
नमःस्वस्तीत्यादिनाचतुर्थी अलंसमर्थोभूष्णुर्भवनशीलः भूष्णुर्भविष्णुर्भवितेत्यमरः ग्लाजिस्थश्चक्स्नुरितिचकाराद्भुवश्चक्स्नुप्रत्ययःकित्वाद्गुणाभावइतिवृत्तिः अतोजैत्रया २
त्रैवकार्यानयज्ञयात्रेतिभावः ९ ननुयज्ञयात्रांतेजैत्रयात्रायामुभयानुसरणंस्यात्तत्राह उत्तिष्ठमानइति उत्तिष्ठमानोवर्द्धमानःउदोनूर्ध्वकर्मणीत्यात्मनेपदं परःशत्रुःपथ्यो
नपेतंपथ्यंहितमारोग्यंचेच्छतापुंसेतिशेषः नोपेक्ष्योनोदासिन्येनद्रष्टव्यःकुतःहियस्माद्वर्त्स्यंतौवर्धिष्यमाणौ वृद्भ्यःस्यसनोरितिविभाषापरस्मैपदं न

उत्तिष्ठमानस्तुपरोनोपेक्ष्यःपथ्यमिच्छता समौहिशिष्टैराम्नातौवर्त्स्यंतावामयःसच १० नदूयेसात्वतीसूनुर्यन्मह्यमपराध्यति यत्तुदं
दह्यतेलोकमदोदुःखाकरोतिमां ११

वृद्भ्यःस्यसनोरितिडागमाभावः आमयोव्याधिः रोगव्याधिगदामयाइत्यमरः सशत्रुश्चशिष्टैःनीतिज्ञैःसमौतुल्यवृ
त्तीआम्नातावाख्यातौकथितौ अल्पीयसोप्यरेर्वृद्धिर्महानर्थायरोगवत् अत स्तस्यानुपेक्ष्यत्वादुभयानुस्मृतिःकुतइतिभावःउपमालंकारः १० नचैवंस्वार्थपरत्वदोषः
स्यात् लोकानुग्रहार्थत्वादस्याः प्रवृत्तेरित्याशयेनाह।नदूयेति सत्वतोपत्यंस्त्रीसात्वतीनामहरेःपितृष्वसा उत्सादिभ्योञ् तस्याःसूनुश्चैद्यःबंधुरपिखलोनमृष्यतइति
भावःमह्यमपराध्यतिद्रुह्यतीतियत् क्रुधद्रुहेत्यादिनाचतुर्थी ततःद्रोहात्इतिशेष यत्तदोर्नित्यसंबंधात् नदूयेनपरितप्येहं दूङ्दैवादिकात्कर्त्तरिलट् उत्तमपुरुषस्यैकवच ३
नं किंतुलोकंदंदह्यते गर्हितंदहतीतियङ् लुपसदचरजपजभदहदशगृभ्योभावगर्हायामितियङ् जपजभदहदशभंजपशांचेत्यभ्यासस्यनुमागमः अदोलोकदहनंमां

दुःखाकरोतिदुःखमनुभावयति दुःखात्प्रातिकूल्येइतिडाच्प्रत्ययः अतश्चैद्यएवाभियातव्यः पार्थस्तुप्रार्थनयापिपश्चात्समाधेयसमर्थइतिभावः ११ स्वमतंनिगमयन्
परमतंशुश्रूषुःपृच्छति ममेति तावद्भवन्मतश्रवणपर्यंतमित्यर्थः मममतमिदं अंगेत्यामंत्रणेव्ययं अथसंबोधनार्थकाःस्युःपाट्प्याडंगहेहैभोइत्यमरः वांयुवयोरपि युष्मद
स्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावाविति वामादेशः मतंश्रूयतां विधौलोट् तदपिमयाश्रोतव्यमन्यथासंदेहानिवृत्तिरितिभावः ननुविदुषस्तेकुतःसंदेहस्तत्राह ज्ञातसा
रः ज्ञाततत्त्वार्थोपिएकःकार्यवस्तुनिकर्तव्यार्थेसंदिग्धेसंशेतेखलुनिश्चितं अतोममापिसंदेहइत्यर्थः दिहउपचयेइतिधातोःकर्तरिलट् घत्वधत्वेच सामान्येनविशेषसमर्थ

ममतावन्मतमिदंश्रूयतामंगवामपि ज्ञातसारोपिखल्वेकःसंदिग्धेकार्यवस्तुनि १२
यावदर्थपदांवाचमेवमादायमाधवः विरराममहीयांसःप्रकृत्यामितभाषिणः १३

नरूपोऽर्थांतरन्यासः १२ यावदिति माधवःहरिः यावानर्थोयावदर्थं यावदवधारणइत्यव्ययीभावः यावदर्थंपदानिअक्षराणि यस्यास्तांअभिधेयसंमिताक्षरा
मित्यर्थः एवमुक्तप्रकारांवाचमादायगृहीत्वाउक्त्वेत्यर्थः विरराम तूष्णीमास व्याङ्परिभ्योरमइतिपरस्मैपदं तथाहि महीयांसःउत्तमाः प्रकृत्यामितभाषिणः
मितंभाषंतेतेमितभाषिणः वृथालापनिषेधादितिभावः पूर्ववदलंकारः १३ ७ ७ ७

-टी अथाष्टभिः कुलकेनरामंवर्णयंस्तद्वाक्यमवतारयति ततइति ततोरामोजगादेत्युत्तरेणान्वयः सपत्नोरिपुः रिपुर्वैरिसपत्नारीत्यमरः तस्यापनयो ऽपकारः तस्यस्मरणेनयो सर्ग

४ नुशयः पश्चात्तापः पश्चात्तापोनुतापश्चविप्रतीसारइत्यपीत्यमरः भवेदनुशयोद्वेषे पश्चात्तापानुबंधयोरितिविश्वः तेनस्फुरतीत्यनुशयस्फुः तेनस्फुरा ओष्ठौबिंबमिवेत्यु २

पमितसमासः रामायाः ओष्ठबिंबस्यचुंबनेनवित्तः प्रसिद्धः रामोष्ठबिंबचुंबनचुंचुः तेनवित्तश्चुंचुप्चणपावितिचुंचुप्प्रत्ययः ओत्वोष्ठयोः समासेवा पररूपंवक्तव्यं ने

नोष्ठेनोपलक्षितः समरस्फुरतयोः समरसइतिभावः उपमानुप्रासयोः संसृष्टिः १४ विवक्षितामिति विवक्षितांवक्तुमिष्टां वचेर्ब्रुञोवासन्नंता-

ततः सपत्नापनयस्मरणानुशयस्फुरा ओष्ठेनरामोरामोष्ठबिंबचुंबनचुंचुना १४ विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृतां प्राप

यन्पवनव्याधेर्गिरमुत्तरपक्षतां १५ घूर्णयन्मदिरास्वादमदपाटलितद्युती रेवतीवदनोच्छिष्टपरिपूतपुटेदृशौ १६ ७

त्कर्मणिक्तः तत्क्षणेविवक्षाक्षणेएवेत्यविलंबेनोक्तिः प्रतिसंहृतांरामानुरोधान्निरुद्धां अर्थविदः कार्यज्ञस्य अतएवपवनव्याधेरुद्धवस्य स्वलङ्गिरः गिरंउ

त्तरपक्षतांसिद्धांतपक्षतांप्रापयन् स्वयमसत्पक्षावलंबित्वादितिभावः अनेनरामस्यव्यग्रतोक्ता १५ घूर्णयन्निति पुनः मदिरास्वादेन मद्यपानेनयोमदस्तेन पाटलि

तारक्तीकृता द्युतिर्ययोस्तेनथोक्तेरेवत्याः देव्याः वदनेयदुच्छिष्टंमद्यलेपतांबूलादिअक्षिचुंबनसंक्रांतमितिभावः तेनपरिपूतेशुद्धेपुटेययोस्तेदृशौघूर्णयन् भ्रामयन्इ ४

तिमद्यविकारोक्तिः उच्छिष्टपरिपूतेत्यत्ररतिकालेसुरवंस्त्रीणांशुद्धमाखेटकेशुनामितिस्मरणात् उच्छिष्टपावनत्वविरोधस्याभासत्वाद्विरोधाभासोलंकारः आभासत्वेविरो

धस्यविरोधाभासउच्यतइतिलक्षणात् १६ ७

आश्लेषेति पुनः आश्लेषलोलुपायाः आलिंगनलुब्धायाः वध्वाः स्तनयोः कार्कश्यस्य काठिन्यस्य साक्षिणीं उपद्रष्ट्रीं नित्यं पीड्यमानतयेति भावः साक्षाद्द्रष्टरि संज्ञायामिति साक्षाच्छब्दा
दिनिप्रत्ययः वनमालां आपादलंबिनी माला वनमालाप्रकीर्तिता अभिमानोष्णैः अहंकारतप्तैः सुखानिलैः निश्वासमारुतैः म्लापयन् ग्लापयन् म्लापयतेर्ण्यन्ताल्लटः शत्रादेशः आदेशइ-
त्यात्वे पुगागमः अम्लाने म्लानसंबंधाभिधानादतिशयोक्तिः १७ दधदिति पुनः संध्यायां अरुणे व्योम्नि स्फुरंतीः ताराः अनुकुर्वंतीति तथोक्ताः कुतः द्विषति शत्रौ द्वेषेण रोषेणो
परक्ते अंगे वपुषि संगिनीः सक्ताः स्वेदविप्रुषः स्वेदबिंदून् पृषंति बिंदुपृषताः पुमांसो विप्रुषः स्त्रियामित्यमरः दधत् दधानः नाभ्यस्ताच्छतुरिति नुमागमाभावः उपमालंकारः १८ प्रोल्लसदि

आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीं म्लापयन्नभिमानोष्णैर्वनमालां सुखानिलैः १७
दधत्संध्यारुणव्योमस्फुरत्तारानुकारिणीः द्विषद्द्वेषोपरक्तांगसंगिनीः स्वेदविप्रुषः १८
प्रोल्लसत्कुंडलप्रोतपद्मरागदलत्विषा कृष्णोत्तरासंगरुचं विदधच्चूतपल्लवीम् १९

ति पुनः प्रकर्षेण उल्लसतोः कुंडलयोः प्रोतानां स्यूतानां पद्मरागदलानां माणिक्यशकलानां त्विषा कांत्या प्रोतेति प्रपूर्वाद्वेञः कर्मणि क्ते यजादित्वात्संप्रसारणं कृष्णोत्तरासंगे नीलोत्त
रीयं द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा संव्यानमुत्तरीयं चेत्यमरः तस्य रुचं चूतपल्लवस्येमां चूतपल्लवीं विदधत् लोहितमिश्रणात् चूतपल्लवं धूम्रां कुर्वन्नित्यर्थः धूम्रधूमलौ
कृष्णलोहिते इत्यमरः अत्राप्यन्यरुचोन्यदा यस्य योगात्सादृश्यापेक्षो निदर्शनालंकारः १९ ७ ७ ७ ७

टी० ककुद्मीति पुनः ककुद्मिकन्यायाः रेवत्याः वक्त्रस्यांतः अभ्यंतरे वासेन स्थितत्वाल्लब्धोऽधिवासो वासना यया सा तया तन्मुखसौरभ्यवासितयेत्यर्थः संस्कारो गंधमाल्याद्यैरधिवासनमु- स०
च्यते मदिरया कृतानुव्याधं कृतसंसर्गं प्रियागंडूषगंधिनमित्यर्थः व्यधजपोरनुपसर्गे इत्यनुपसृष्टाद् अप्प्रत्ययविधानादुपसृष्टाद् व्यधेर्घञ्प्रत्ययः सुखामोदं स्वसुखगंधविशेषं आमो २
दः सोऽतिनिर्हारीत्यमरः उद्वमन् उद्गिरन् अत्र मदिरारामसुरवयोः स्वगंधतिरोधानेन रामासुरवतद्गंडूषमद्यगंधस्वीकारात्तद्गुणयोस्तथोत्तरस्यात्मविशेषकत्वेन पूर्वसापेक्षत्वादंगां
गीभावेन संकरः तद्गुणस्वगुणत्यागादन्योत्कृष्टगुणाकृतिरिति २० जगादेति वदनमेव छद्म व्याजरूपं यस्य तत् तत्पद्मं वदनमेव पद्ममित्यर्थः छद्मादिशब्देनासत्यत्वप्रतिपादनरू

ककुद्मिकन्यावक्त्रांतर्वासलब्धाधिवासया सुखामोदं मदिरयाकृतानुव्याधमुद्वमन् २०

जगाद वदनच्छद्मपद्मपर्यंतपातिनः नयन्मधुलिहश्श्वैत्यं उदग्रदशनांशुभिः २१

यद्वासुदेवेनादीनमनादिनवमीरितं वचसस्तस्य सपदि क्रिया केवलमुत्तरम् २२

पोऽपन्हवः तस्य पर्यंतपातिनः प्रांतचारिणः मधु लिहंतीति मधुलिहः मधुपात् क्विप् उदग्रैरुच्छ्रितैर्दशनांशुभिः श्वैत्यं धावल्यं नयन् इति तद्गुणालंकारः तस्य मधुप
सन्निधायकापन्हवसापेक्षत्वात्तेन संकरः २१ रामो जगादेत्युक्तं किं तदित्याकांक्षायामाह यदिति वासुदेवेन न दीनमित्यदीनं अकातरं न विद्यते आदिनवोऽस्येत्यनादिनवं ५
निर्दोषं आदिनवो दोषो मत इति हलायुधः यद्वच ईरितं उत्तिष्ठमानस्तु पर इत्यादिना यानपक्षमाश्रित्य यदुक्तमित्यर्थः तस्य वचसः सपदि क्रियाकरणं केवलं सद्योऽनुष्ठानमेवोत्तरं
सिद्धांतस्येवोक्तत्वादिति भावः २२

नैतदिति लघुसंक्षिप्तमप्येतद्वचोभूयस्याबहुतरयाविस्तृतयापीत्यर्थः द्विवचनविभज्येत्यादिनाईयसुनिबहोर्लोपोभूचबहोरितिईकारलोपोबहोर्भूशब्दादेशः वाचानातिशय्य तेनातिरिच्यते गुर्वर्थत्वादितिभावः शीङःकर्मणिलटियक् अयङ्यिक्ङितीत्ययङादेशः तथाहि इंधनौघान् दहतीतिइंधनौघधक्काष्ठराशिदाहकःभूयानपीत्यर्थः द्वि पित्वंमष्भावः अभिस्त्विषाप्रभयापूषणंसूर्यंअल्पीयांसमपीतिभावः नात्येतिनाक्रामतितेजसः प्रभावत्त्वमिववचसोर्थवत्त्वमलंघ्यहेतुरित्यर्थः अत्रसमानधर्मोबिंबप्र तिबिंबतयादृष्टांतालंकारः २३ यदिहारिवचोनातिशय्यते अलंतर्हितत्वापिवागारंभैरत आह संक्षिप्तेति अतोहरिवचसोनतिशयनीयत्वादेवसविस्तरतराः सप्रपंचतराः

नैतल्लघ्वपिभूयस्यावचोवाचातिशय्यते इंधनौघधगप्यग्निस्त्विषानात्येतिपूषणं २३
संक्षिप्तस्याप्यतोस्यैववाक्यस्यार्थगरीयसः सविस्तरतरावाचोभाष्यभूताभवंतुमे २४

प्रथनेवावशब्दे इतिघञ्प्रतिषेधोऋदोरप्इत्यप् मेवाचः संक्षिप्तस्याल्पाक्षरस्याप्यर्थेनगरीयसः सूत्रकल्पस्येत्यर्थः अल्पाक्षरमसंदिग्धंसारवद्विश्वतोमुखं अस्तो भ्यमनवद्यंचसूत्रंसूत्रविदोविदुरितिलक्षणात् अस्यैवनान्यस्यवाक्यस्यभाष्यभूताः भाष्यैः समाः नित्यसमासः क्ष्मादेराजंतोवभूतंस्यात्क्लीबेनीतेसमेत्रिष्विति वैजयंती भवंतुव्याख्यानरूपाभवत्वित्यर्थः सूत्रव्याख्यानविशेषोभाष्यं सूत्रस्थंपदमादायवाक्यैः सूत्रानुकारिभिः स्वपदानिचवर्ण्यंतेभाष्यंभाष्यविदोविदुरिति मयातुसदेवविशे षप्रकाशनायव्याख्यायतेनत्वतिशायमत्वाख्यायतेखंडयनइत्यदोषइत्यर्थः उपमालंकारः २४ ७ ७ ७ ७

र॰टी॰ इत्थंयानंसिद्धांतमित्वा तभोद्भवमतिरोधंतद्दिनिधायत्रिभिः मत्साचष्टे विरोधीति कृतिनांकुशलानांगिरः कर्त्र्यः विरोधिवचसः प्रतिकूलवादिनोवागीशान्वक्तॄनपि वदोवदावदोव स॰
६ काबागीशोवाक्पतिःसमाइत्यमरः मूकान्निर्वाचःकुर्वते लज्जायंतीत्यर्थः अनुलोमोनुकूलोर्थोभिधेयंयेषांतेनुलोमार्थाः अनुकूलवादिनः तान्जडानमंदानपिप्रवाचः प्रगल्भवा २
चःकुर्वतेअतोनास्माद्गिरः प्रवाच्याइतिभावः अत्रवागीशानांमूकीकरणाज्जडानांप्रवाचीकरणाच्चाशक्यवस्तुकरणरूपोविशेषालंकारःरूपभेदोसंबंधरूपातिशयोक्तिः प्रतिबोद्धा
पितइतिसंकरः २५ नन्वात्मनीनेनस्वामिनाबुद्धेः फलमनाग्रहइतिन्यायेनशास्त्रज्ञवचनंप्रतिकूलमपिग्राह्यमेवेत्याशंक्याह षडिति दुष्टामेधायेषांतेदुर्मेधसोमंदबुद्धयो

विरोधिवचसोमूकान्वागीशानपिकुर्वते जडानप्यनुलोमार्थान्प्रवाचःकृतिनांगिरः २५
षड्गुणाःशक्तयस्तिस्रःसिद्धयश्चोदयास्त्रयः ग्रंथानधीत्यव्याकर्त्तुमितिदुर्मेधसोप्यलं २६

पि नित्यमसिच्प्रजामेधयोरितिसमासांतो ऽसिच्प्रत्ययः ग्रंथानौशनसादीनधीत्यपठित्वागुणाः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः षट्शक्तयः प्रभुमंत्रोत्सा
हाख्यास्तिस्रःसिद्धयः पूर्वोक्तशक्तित्रयसाध्याः पुरुषार्थलाभात्मकास्ताश्चतिस्रः प्रभुसिद्धिर्मंत्रसिद्धिरुत्साहसिद्धिश्चेतिउदयाः आत्मोदयमित्रोदयमित्रमित्रोदयाः वृद्धिक्ष
यस्थानानिच्छभिन्यायेनोदयाउच्यंते तत्रवृद्धिक्षयौस्वशक्तिसिद्धोः पूर्वोक्तस्यातउपचयापचयौ स्थानंसाम्येनावस्थानं तेचत्रयइतिव्याकर्त्तुंव्याख्यातुमलंसमर्थाः पर्याप्तिव ६
चनेष्वलमितितुमुन्प्रत्ययः पंचांगनिर्णयशक्तिविकल्पानांसंध्यादिस्वरूपसंख्यामात्रपाठकानां अशास्त्रज्ञत्वाद्बुद्धवादयोनग्राह्यवचनाइति अभिसंधिः अत्रामरः संधिर्नाविग्रहो

यानमासनंद्वैधमाश्रयः षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमंत्रजाः क्षयः स्थानंच वृद्धिश्च त्रिवर्गोनीतिवेदिनामिति तत्रारिविजिगीषोर्व्यवस्थाकर
णमैक्यंसंधिः विरोधोविग्रहः विजिगीषोररिंप्रतियात्रायानंतयोर्मिथः प्रतिबद्धशक्त्योः कालप्रतीक्षयातूष्णीमवस्थानमासनं दुर्बलप्रबलयोर्द्विषो
र्वाचिकमात्मसमर्पणंद्वैधीभावः अरिणापीड्यमानस्यबलवदाश्रयणंसंश्रयः कोशदंडोत्थंतेजः प्रभावः षड्गुणचिंतनंमंत्रः कर्तव्यार्थेषुस्थेयान्प्रयत्नः
उत्साहः गतमन्यदितिसंक्षेपः २६ ननुशास्त्रोक्तार्थव्याख्यानेनशास्त्रज्ञएवग्राह्यवचनइत्याशंक्यनेत्याह अनिर्लोडितेतिनालोकितंकार्यंयेनतस्य

अनिर्लोडितकार्यस्यवाग्जालंवाग्मिनोवृथा निमित्तादपराद्धेषोर्धानुष्कस्येववल्गितं २७

कार्याकार्यमजानतइत्यर्थः वचोस्यसंतीतिवाग्मीवावदूकः वाचोयुक्तिपटुर्वाग्मीवावदूकोतिवक्तरीत्यमरः वाचोग्मिनिरितिग्मिनिप्रत्ययः तस्यवाग्जालंवागाडंब
रोनिमित्ताल्लक्ष्यात् वेध्यंलक्ष्यंनिमित्तंचशरव्यंच समंविदुरितिवैजयंती अपराद्धेषोः स्खलितबाणस्य धनुः प्रहरणमस्येतिधानुष्कोधन्वी प्रहरणमितिठक् इसु
सुक्तांतात्कः अपराद्धपृषत्कोसौलक्ष्याद्यश्च्युतसायकः धन्वीधनुष्मान् धानुष्कइत्यमरः तस्यवल्गितमिववृथानिष्फलं कार्यज्ञस्यवचोग्राह्यं ननुवा
चाटस्येतिभावः २७ ७ ७ ७ ७ ७ ७

०टी इत्थंषड्गुणादि पाठमात्रं नमंत्रइतिसिद्धेस्त्वयं मंत्रस्वरूपमाह सर्वेति कार्याणिसंध्यादीनिनानिशरीराणीन इत्कपमितसमासः व्यासोसौगतानामिति लिंगात् ते स०
६ षुसर्वेषुकार्यशरीरेष्विव सर्वकार्येषिवित्यर्थः अंगानिस्कंधाइ वेतिपूर्ववत्समासः तेषांपंचकंमुक्त्का स्कंधपंचकमिवांगपंचकंहित्वेत्यर्थः पंचपरिमाणमस्येतिपं २
चकः संख्यायाः संज्ञासंघसूत्राध्ययनेषु इतिकन्प्रत्ययः सुगतोभक्तिर्भजनीयोयेषांसौगताबौद्धाः भक्तिरित्यण्प्रत्ययः तेषामन्य आत्मेवमहीभृताम
न्योनास्ति कर्मणामारंभोपायः पुरुषद्रव्यसंपत्तिः देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिश्चेति पंचांगानि यथाह कामंदकः सहायाः साधनोपा

सर्वकार्यशरीरेषुमुक्त्वांगस्कंधपंचकं सौगतानामिवात्मान्योनास्तिमंत्रोमहीभृताम् ॥२८

याविभागोदेशकालयोः विनिपातप्रतीकारः सिद्धिः पंचांगमिष्यतइति रूपवेदनाविज्ञानसंज्ञासंस्काराः पंचस्कंधाः तत्रविषयप्रपंचोरूपस्कंधः नामप्रपं
चः संज्ञास्कंधः वासनाप्रपंचः संस्कारस्कंधः एवंपंचविधापरिवर्तमानोविज्ञानसंतानएवात्मेति बौद्धाः एवंयथाबौद्धानांसर्वेषुशरीरेषुस्कंधपंचकातिरि ७
क्तआत्मानास्ति तथाराज्ञांमुक्तांगपंचकातिरिक्तोमंत्रोनास्तीत्युपमालंकारः तच्चास्माकंसमग्रमेवेत्यथमेवयात्राकालइतिभावः २८ ७
श्रीसीतारामःप्रसन्नोस्तु ७ ७ ७ ७ ७ ७

अथमंत्रिनार्थक्रियाविलंबेदोषमाह मंत्रइति संवृतैः गुप्तैः सर्वांगैः पूर्वोक्तैरुपायादिभिरुरः स्थलादिभिश्चउपलक्षितोपिसर्वांगसंवृतोपीत्यर्थः मंत्रोविचारः अधीरोभीरुः युध्यतइतियोधोभटइवपश्चाद्यच् परेभ्योयेभ्योऽरिभ्यश्च परंदूरान्यसुरव्येषु परोरिपरमात्मनोरितिवैजयंती भेदोविदारणं तृतीयगामित्वंच तस्यशंकयाचिरंस्थातुंविलंबितुमित्यर्थः नसहतेनक्षमतेशकधृषेत्यादिनातुमुन्प्रत्ययः अतोनविलंबितव्यंअन्यथामंत्रभेदेः कार्यहानिः स्यादितिभावः २९ किंचनीतिस्वरूपपर्यालोचन यापिनविलंबः कार्यइत्यभिप्रायेणाह आत्मोदयइति आत्मनः उदयोवृद्धिः परस्यशत्रोर्ज्यानिः हानिः वीज्याज्वरिभ्यो

मंत्रोयोधइवाधीरः सर्वांगैः संवृतैरपि चिरंनसहतेस्थातुं परेभ्योभेदशंकया २९ आत्मोदयः परिज्यानिर्द्वयंनीतिरितीयती तदुरीकृत्यकृतिभिर्वाचस्पत्यंप्रतायते ३०

निरीत्योणादिकोनिप्रत्ययः इतिद्वयंइदंपरिमाणमस्याअस्तीति इयती एतावती किमिदंभ्यांवोघइतिवतुप्रथमश्च उगितश्चेतिङीप् नीतिः नीतिसंग्रहः एतद्व्यातिरिक्तोन कश्चिन्नीतिपदार्थोस्तीत्यर्थः यदन्यत् षाड्गुण्यादिवर्णनं सर्वोयमस्यैव प्रपंचइत्याह तदिति तवद्द्वयमुरीकृत्य अंगीकृत्य उरीकृत मुररीकृतमंगीकृतमित्यमरः ऊर्यादिच्विडाचश्चेतिगतिसंज्ञायांकुगतिप्रादयइतिसमासः ल्योत्यबादेशः कृतिभिः कुशलैः वाचस्पत्यंवाग्मित्वं कस्कादित्वाद लुक् सत्वेषष्ठ्याः पतिपुत्रेत्यादिनासत्वमितिस्वामी तन्नछंदोविषयत्वात् ब्राह्मणादित्वात्ष्यञ्प्रत्ययः प्रतायते विस्तार्यते कर्मणिलट् तनोतेर्यकिइत्यात्वंतस्मादात्मोदयार्थिभिरविलंबाच्छत्रुरुच्छेतव्यः तन्नांतरीयकत्वात्तस्येतिभावः ३०

कु॰टी॰ ननुलब्धोदयस्यकिंपरोच्छित्त्येत्यत्राह तृप्तियोगइति महीयसांमहात्मनाम् परेणातिप्रभूतेनापिमहिम्नाऐश्वर्येण तृप्तियोगः संतोषलाभोन अत्रतृप्त्यभावे स॰
पूर्णःसन् चंद्रोदयाकांक्षीदृष्ट्यर्थमितिभावः महार्णवोदृष्टांतोनिदर्शनंउपमानमितियावत् नराज्ञावृद्धावलंबुद्धिः कार्या असंतुष्टाद्विजानष्टाः संतुष्टाश्च २
महीभुजः सलज्जागणिकानष्टानिर्लज्जाचकुलांगनेतिन्यायादितिभावः नायंदृष्टांतालंकारः बिंबप्रतिबिंबाभावेनौपम्यस्यगम्यत्वेतस्योत्थानात् किंतु

तृप्तियोगःपरेणापिनमहिम्नामहीयसां पूर्णचंद्रोदयाकांक्षीदृष्टांतोत्रमहार्णवः ३१
संपदास्सुस्थिरंमन्योभवतिस्वल्पयापियः कृतकृत्योविधिर्मन्येनवर्धयतितस्यतां ३२

दृष्टांतशब्देन तस्याभिधानादुपमालंकारः अतएव दृष्टांतोदाहरणनिदर्शनरूपाः शब्दानप्रयोक्तव्याः पौनरुक्त्यापत्तेरित्येकावलीकारः ३१ तथा
पिसंतोषेदोषमाह संपदेति यः स्वल्पयापिसंपदास्सुस्थिरमात्मानंमन्यत इतिसुस्थिरंमन्यः स्वस्थमानीभवति आत्ममानेस्वशश्चेति स्वशप्रत्ययेमु ८
मागमः तस्याल्पसंतुष्टस्यतांसंपदं कृतकृत्यस्तावतैव कृतार्थोविधिर्दैवमपिनवर्धयति पौरुषहीनाद्दैवमपिजुगुप्सते तस्यवृत्तेःपरार्थत्वादितिभावः ३२

किंच पराक्रमलब्ध एवोदयो नान्य इत्याह समूलेति मानिनः अभिमानवंतः परान् शत्रून् समूलं हत्वा समूलघातं अघ्नंतः अत्यंतमनुन्मूलयंत इत्यर्थः समूला कृतिजीवेषु हन्कृञ्ग्रहः इति णमुल्प्रत्ययः कषादिषु यथाविध्यनुप्रयोग इति हंतेरनुप्रयोगः नोद्यंति किंतु हत्वैवोद्यंतीत्यर्थः तत्र हत्वैवोदये अंधयतीत्यंधं गाढं तमोंध- तमसं ध्वांते गाढेंधतमसमित्यमरः अवसमंधेभ्यस्तमस इति अच्प्रत्ययः प्रध्वंसितमंधतमसं येन सः उदयात्प्रागिति भावः रविरुदाहरणं दृष्टांतः अत्रापि दृष्टांतोऽत्र

समूलघातमघ्नंतः परान्नोद्यंति मानिनः प्रध्वंसितांधतमसस्तत्रोदाहरणं रविः ३३
विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ॥ अनीत्वा पंकतां धूलिमुदकं नावतिष्ठते ३४

महार्णव इति वद् उपमालंकारो न तु दृष्टांत इति द्रष्टव्यं ३३ किंचानुच्छिन्नशत्रोः प्रतिष्ठैव दुर्घटेत्याह विपक्षमिति विपक्षं शत्रुमखिलमुच्छिन्नमकृत्वा अनुन्मूल्येत्यर्थः नावतिष्ठते किंतु नीत्वैवावतिष्ठतीत्यर्थः समवप्रविभ्यः स्थ इत्यात्मनेपदं वाक्यभेदेन प्रतिबिंबाप्रपेक्षा दृष्टांतालंकारः ३४ नन्वयं शिशुपाल एकाकिनोऽस्मान् किं करि ष्यतीत्याशंक्याह ध्रियत इति एकोऽपि रिपुर्यावत् ध्रियते अवतिष्ठते धृङ् अवस्थाने इति धातोस्तौदादिकात्कर्तरि लट् रिङ् शयग्लिङ्क्षु इति रिङादेशः तावदवधि-

ही· सुखंकुतः यावत्तावच्च साकल्येवधावित्यमरः तथाहि सिंहिकायाः अपत्यंपुमान्सैंहिकेयोराहुः तमस्तुराहुःस्वर्भानुःसैंहिकेयोविधुंतुद इत्यमरः स्त्रीभ्योढक् असु रद्रुहांदेवानांपुरः अग्रेसोमंक्लिश्नातिबाधते शत्रुर्यात्सोमग्रहणंसूर्यंचेतिभावः तस्मादेकोपिशत्रुःछेत्तव्य इतिभावः अग्नेः शेषमृणाच्छेषंशत्रोः शेषंनशेषयेदितिताल्प र्यं विशेषणसामान्यसमर्थनरूपोर्थांतरन्यासः ३५ ननुक्षुद्रोयंचैद्यःकिमस्माकंकरिष्यतीत्याशंक्यतस्यबलवत्तांवक्तुं मित्रामित्रबलाबलविवेकंतावत्करोति सखे- ति क्रियया उपकारापकारान्यतररूपयानिर्वृत्तःकृत्रिमः ड्वितःक्त्रिः क्त्रेर्मम्नित्यमित्यम् सखाराहृतगरीयान्बलवान् एवंशत्रुश्च कृत्रिमोगरीयान्कुतः हियस्मात्ते स·

ध्रियतेयावदेकोपिरिपुस्तावत्कुतःसुखं पुरःक्लिश्नातिसोमंहिसैंहिकेयोसुरद्रुहां ३५
सखागरीयान्शत्रुश्चकृत्रिमस्तौहिकार्यतः स्यातामभित्रौमित्रेचसहजप्राकृतावपि ३६

कृत्रिममित्रशत्रू कार्यतः उपकारापकाररूपकार्यवशात् निर्वृत्तावितिशेषः उक्तकार्योपाधेयविज्जीवमनःप्रसादनयोर्मित्रामित्रभावोप्यनपायीतिगरीयस्त्वमितिभावः सहजप्राकृतौ तुनैवमित्याह स्यातामितिसहजानःसहजः एकशरीरावयववान् तत्रसहजंमित्रंमातृष्वस्रेयसैंतृष्वस्रेयादि सहजशत्रुस्तुपितृव्यस्तत्पुत्रादिः भक्त त्यासिद्धःप्राकृतः पूर्वोक्तसहजकृत्रिमरहितलक्षण इत्यर्थःतत्र विषयानंतरःप्राकृतः शत्रुः तदनंतरः प्राकृतंमित्रं अपिस्त्वर्थेतौसहजप्राकृतौतुशत्रूमित्रेवा ९
अमित्रौमित्रेचस्यातांनावास्मकार्यवशात् अनियमेनोभयरूपतामापद्येते नकृत्रिमशत्रुमित्रे कृत्रिमशत्रुः शत्रुरेवमित्रंचमित्रमेवेति कृत्रिमावेव मित्रामित्रौगरीयांसौ

ननुसहजोनापिप्राकृतो इत्यर्थः अनेनकृत्रिमत्वंसर्वापवादीतिसिद्धं ३६ एवंचेदस्माकंपैतृष्वस्रेयः शिशुपालः सहजमित्रत्वात्संधातव्योननुयातव्य इत्यत आह
उपकर्त्रेति उपकर्त्रा उपकारिणा अरिणापिसहजेनप्राकृतेनवेतिशेषः संधिः कार्यः अरित्वापवादे नकृत्रिममित्रतायाबलीयस्त्वाद्यावज्जीवभाविन्यास्तत्रोत्पन्नत्वादि
तिभावः एवमपकारिणामित्रेणापिसहजेनप्राकृतेनवेतिशेषः संधिर्नकार्यः मित्रत्वापवादेनकृत्रिमशत्रुतायाबलीयस्त्वाद्यावज्जीवभाविन्यास्तत्रोत्पन्नत्वादितिभावः

उपकर्त्रारिणासंधिर्नमित्रेणापकारिणा उपकारापकारौहिलक्ष्यंलक्षणमेतयोः ३७
त्वयाविप्रकृतश्चैद्योरुक्मिणींहरताहरे बद्धमूलस्यमूलंहिमहद्वैरतरोःस्त्रियः ३८

ननुसाक्षादरिणःसंदध्यान्मित्रेणवाकथंविरुध्यादित्याशंक्यक्रियया तयोर्वैपरीत्यादददोषइत्याह हियस्मादुपकारापकारावेवतयोर्मित्रामित्रयोर्लक्षणंस्वरूपंलक्ष्यंद्रष्ट
व्यं उपकर्त्रैवमित्रं अपकर्त्रैवशत्रुरित्यर्थः तस्मात्सहजमित्रत्वेपिचैद्यः क्रिययाशत्रुत्वाद्यातव्यएवेतिभावः ३७ अथचैद्यस्यकृत्रिमशत्रुत्वंचतुर्भिराह त्वयेति हे
हरे रुक्मिणींहरताबंधुभिः समस्तैः प्रदत्तांराक्षसधर्मेणोद्वहतेत्यर्थः राक्षसोयुद्धहरणादितियाज्ञवल्क्यः गांधर्वोराक्षसश्चैवधर्म्यौक्षत्रस्यतौस्मृताविति मनुः

टी॰ त्वयाचैद्योविप्रकृतः तथाहिबद्धमूलस्य गूढमूलस्य वैरतरोः स्थियः महत्प्रधानंमूलंहि रूपकसंसृष्टोयमर्थांतरन्यासः सामान्येनविशेषसमर्थनरूपोर्थांतरन्या- स॰
सः ३८ अथतेनापित्वंविप्रकृतइत्याह त्वयिभूमेरपत्यंपुमान्भौमंनरकासुरंजेतुंगतेसतिसचैद्यइमांपुरीं द्वारकांप्रोषितोर्यमासूर्योयस्याः तांमेरोस्तटींसानुमंधका २
रइवारौत्सीत् रुद्धवान् रुधेर निगेलुङिसिचिवृद्धिः ३९ अपकारांतरमाह आलप्येति सचैद्योबभ्रोर्यादवभेदस्यदारान्भार्याः भार्याजायाथपुंभूम्निदारास्यात्तु

त्वयिभौमंगतेजेतुमरौत्सीत्सपुरीमिमां प्रोषितार्यमणंमेरोरंधकारस्तटीमिव ३९
आलप्यालमिदंबभ्रोर्यत्सदारानपाहरत् कथापिखलुपापानामलमश्रेयसेयतः ४०

कुटुंबिनीत्यमरः अपाहरत् इतियदीदंदारापहरणं आलप्योच्चार्य अलंमालपनीयमित्यर्थः अलंखल्वोः प्रतिषेधयोः प्राचांक्त्वेतिक्त्वाप्रत्ययेसमासेल्यबादेशः यतः
पापानांपाप्मनां कथाकथनमुच्चारणमपि चिंतिपूजिकथिकुंभिचर्चश्चेत्यङ्प्रत्ययः अश्रेयसे अनर्थाय अलंसमर्थोनमः स्वस्तीत्यादिनाचतुर्थी अत्रनिषिध्य १०
मानालपनमश्रेयःप्राप्तिः तन्मुखेन तत्कारणालपननिषेधसमर्थनात्कार्येण कारणसमर्थकोर्थांतरन्यासः ४० ॐ ॐ ॐ

फलितमाह विराड्इति एवंभवताविराड्ः विप्रकृतः राधेरनिटः कर्मणिक्तः बहुधानोस्माकंचविराड्‍विप्रकर्ताश्रुतश्रवानामहरेः पितृष्वसातस्याः सुतः पैतृष्वस्रेयत्वात्सहजमित्रमपीतिभावः सचैद्यः क्रियापूर्वोक्तान्यायक्रिययाअरिर्निवर्त्यते कृत्रिमः शत्रुःक्रियतइत्यर्थः अतोबलीयस्त्वादनुपेक्ष्यइतिभावः ४१ अत्राप्युपेक्षायांदोषमाह विधायेति येनरः पुमांसः स्युः पुमांसः पंचजनाः पुरुषाः पूरुषानरइत्यमरः सामर्षेमागेवसरोषे अरौवैरंविधायस्वयंचापकृत्येत्यर्थः उदासंतेउपेक्षंते तेनरः कक्षेगुल्मे कक्षौचतृणवीरुधावित्यमरः कक्षस्तुगुल्मेमहिषेजरावर्णास्पदेतृणइतिवैजयंती उदर्चिषंअग्निंप्रक्षिप्याभिमारुतं

विराड्एवंभवताविराड्ाभवताचनः निवर्त्यतेरिः क्रिययासश्रुतश्रवसः सुतः ४१
विधायवैरंसामर्षेनरोऽरौयउदासते प्रक्षिप्योदर्चिषंकक्षेशेरतेतेभिमारुतं ४२

भिमारुतं आभिमुख्येव्ययीभावः शेरतेस्वपंति तद्न्नाशहेतुरित्यर्थः शाङोरुडितिरुडागमः अत्रयेउदासतेशेरतेइतिविशिष्टोदासीनशयनयोर्वाक्यार्थयोर्निर्दिष्टे कक्षसंभवात्सादृश्यलक्षणायांअसंभवद्वस्तुसंबंधोवाक्यार्थवृत्तिरितिनिदर्शनालंकारभेदः नचायंदृष्टांतः वाक्यभेदेनबिंबप्रतिबिंबकरणात्क्षेपेतस्योत्थानात् अत्रतुवाक्यार्थेवाक्यार्थसमारोपात् वाक्यैकवाक्यतायांतदभावइति अलंकारसर्वस्वकारः ४२

तथापि बांधवत्वात्सोढव्य इत्याशंक्याह मनागनेति यः क्षमीसहनः शमित्यष्टाभ्योघिनुणिति घिनुण्प्रत्ययः स सोढा मनागल्पं वा अभ्यावृत्त्या प्रीतिभावः अनभ्या म०
वृत्त्या सकृद्वा अनल्पत्वेतिभावः विराध्यंतमपकुर्वाणं भृशंक्षाम्यतु क्षम्यतां संभावनायांलोट् शमामिष्टानामितिदीर्घः क्रियासमभिहारेण भृशंपौनःपुन्येन वेत्यर्थः २
नचपुंवाक्येष्वनेकार्थत्वंदोषाय विराध्यंतंकः क्षमेतसोढुंशक्नुयात् नकोपीत्यर्थः शकिलिङ्चेतिशक्यार्थेलिङ् क्षमूषसहने दैवादिको भौवादिकश्च ४३ ननु सर्वदाक्ष
मैवपुंसोभूषणंअतोअपराधेपिक्षंतव्यंमतआह अन्यदेति क्षमाअन्यदासुरतव्यतिरिक्ते काले योषितोलज्जेवपुंसोभूषणं अन्यदा ऽ परिभवेशमोभूषणं परिभ
वेतु योषितः सुरतेष्विवैयात्यंधार्ष्ट्यमिव धृष्टेधृष्णुर्वियातःस्यादित्यमरः पराक्रमः पौरुषंभूष्यते ऽ नेनेतिभूषणमाभरणं एवंचक्रियावचनत्वान्नियतलिंगत्वावि

मनागनभ्यावृत्त्यावाकामंक्षाम्यतु यः क्षमी क्रियासमभिहारेणविराध्यंतंक्षमेतकः ४३ अन्यदाभूषणंपुंसः क्षमालज्जेवयोषितः
पराक्रमः परिभवेवैयात्यंसुरतेष्विव ४४ माजीवन्यः परावज्ञादुःखदग्धोपिजीवति तस्याजननिरेवास्तुजननीक्लेशकारिणः ४५

रोधइतिवल्लभोक्तंप्रयुक्तं ४४ अथपरिभवेप्यपराक्रमेत्रिभिर्निंदामाह माजीवन्निति यः परस्यापकर्त्तुः अवज्ञया ऽ वमानेनयद्दुःखंतेनदग्धः तप्तः अतएवमाजी
वन्गर्हितजीवीसन् माङ्याक्रोशइतिलटः शत्रादेशः जीवतिप्राणान्धारयति जनन्याः क्लेशकारिणः गर्भधारणाप्रसवादिवेदनाकारिणः तद्व्यतिरिक्तार्थेक्रियाहीनस्ये ११
त्यर्थः तस्याजननमजननिरस्तु सतिरेवास्तु जननीक्लेशानिवृत्त्यर्थंइतिभावः आक्रोशेनञ्यनिरितिनञ्पूर्वाज्जनिधातोरनिप्रत्ययः ४५ ७

पादेति यद्रजः पादाहतं पादेनाहतं सत् मूर्धानमाहंतुरेव शिरोधिरोहति तद्रजः अचेतनमपीति भावः अपमानेसत्यपिस्वस्थात्संतुष्टाद्देहिनश्चेतनादूरंश्रेष्ठं व्यतिरेकालंकारः ४६ असंपादयतइति किंच जातिर्ब्राह्मणत्वादिः क्रियाइज्याध्ययनादिः गुणःशौर्यादिः तैःसाधनैः करणेतृतीया कंचिदर्थंसुकृतकीर्त्यादिपुरुषार्थं अन्यत्रगोत्वजाति पाकशौक्ल्यादिभिः स्वाभिधेयभूतैः करणैःकंचिदर्थंदोहनादिसंज्ञादिव्यवहाररूपंप्रयोजनमसंपादयतःउभयत्रतादृग्जात्याद्यसंभवादिति भावः पुंसोजन्मसत्तालाभः यदृच्छाशब्दवत् इच्छापरिकल्पितस्यजात्यादिप्रवृत्तिनिमित्तशून्यस्यडित्थादिशब्दस्येव तत्रतस्येवेतिवति प्रत्ययः स्वेच्छा

पादाहतंयदुत्थायमूर्धानमधिरोहति स्वस्थादेवापमानेपिदेहिनस्तद्वरंरजः ४६ असंपादयतः कंचिदर्थंजातिक्रियागुणैः यदृच्छाशब्दवत्पुंसः संज्ञायैजन्मकेवलं ४७ तुंगत्वमितरानाद्रौनेदंसिंधावगाधता अलंघनीयताहेतुरुभयंतन्मनस्विनि ४८

यदृच्छास्वच्छंदः स्वैरितास्वैरिताः समाइतिकेशवः संज्ञायैकेवलंसंज्ञार्थमेवएकत्र पारिभाषिकंकिंचिन्नाममात्रमनुभवितुंअन्यत्रतादृङ्नामभवितुमित्यर्थः ४७ एवमपौरुषंदूषयित्वापौरुषंभूषयति तुंगत्वमिति अद्रौतुंगत्वमोन्नत्यंअस्तीतिशेषः अस्तिर्भवंतीपरोप्रयुज्यमानोस्तीतिभाष्यात् भवतीतिपूर्वाचार्याणांलटः संज्ञा इतरा अगाधतानास्ति सिंधौसमुद्रेअगाधतागंभीरतास्ति इदंतुंगत्वंनास्ति मनस्विनिधीरेतु अलंघनीयताहेतुरलंघनस्यकारणंतदुभयंतुंगत्वमगाधत्वंच तस्मादद्रिसिंधुभ्यामधिकोमनस्वीतिव्यतिरेकालंकारः ४८ ७ ७ ७

शि. संप्रतिशत्रौमार्दवंअनर्थायेत्याह तुल्यइति स्वर्भानुः राहुरपराधेअपकारेतुल्येपिभानुमंतंसूर्यंचिरेणग्रसतेहिमांशुमाशुग्रसतेगिलति यत्ग्रसतेग्लास स.
तेर्गीर्णाविस्यभिधानात् तन्म्रदिम्नः मार्दवस्यफलंस्फुटं तस्माद्विपक्षेतीक्ष्णेनभवितव्यंअन्यथामृदुः सर्वत्रबाध्यतइतिभावः एतच्चप्रस्तुतमप्रस्तुतार्कें दु २
कथनेनसारूप्यात्प्रतीयतइत्यप्रस्तुतप्रशंसाभेदोयं अप्रस्तुतस्यकथनात्प्रस्तुतंयत्रगम्यते अप्रस्तुतप्रशंसेयंसारूप्याद्विनिरूप्यतेइतिलक्षणात् ४९
एतदेवभंग्यंतरेणाप्याह स्वयमिति असाराणांदुर्बलानांनिदर्शनंदृष्टांतः अतएवईषदसमाप्तंतृणंबहुतृणंतृणकल्पइत्यर्थः विभाषासुपोबहुच्पुरस्ता

तुल्येपराधेस्वर्भानुर्भानुमंतंचिरेणयत् हिमांशुमाशुग्रसतेतन्म्रदिम्नःस्फुटंफलं ४९
स्वयंप्रणमतेल्पेपिपरवायावुपेयुषि निदर्शनमसाराणांलघुर्बहुतृणंनरः ५०

दितिबहुच्प्रत्ययः प्रकृतेःपूर्वंभवति स्यादीषदसमाप्तौतु बहुच्प्रकृतिलिंगके इतिवचनात् प्रकृतिलिंगतालघुः निष्प्रौरुषोनरोल्पेपिपरोवायुरिवेत्युपमितसमासः
बहुतृणमितिस्पष्टोपमा साहचर्यात्कल्पदेश्यदेशीयाद्इतिदंडिनाकल्पत्वादीनामौपम्यवाचकेष्वभिधानात् तस्मिन्नुपेयुषिप्राप्तेसति स्वयंप्रणमते स्वयमेवप्र
ह्वीभवतिकर्मवत्कर्मणातुल्यक्रियइतिकर्मवाची यथाहकामंदकः यदासमस्तंप्रसभंनिहंतुंपराक्रमादूर्जितमप्यमित्रं तदाभियायादहितानिकुर्वन्नुपांततः १२
कर्षणपीडनानिइति भावकर्मणोरित्यात्मनेपदं नदुहस्नुनमांयक्चिणाविति यक्प्रतिषेधः वायुनातृणमिवाल्पीयसापिरिपुणालघुरक्लेशेनपरिभूयतइत्यर्थः
उपमालंकारः ५०

गुनः पौरुषे गुणमाह तेजस्वीति दवीयानतिदूरस्थोपि स्थूलदूरेत्यादिना पूर्वगुणयणादिं परलोपो तेजस्वी तेजस्विनां मध्ये गण्यते संख्यायते तथाहि पंचाग्निसाध्यं तपोय स्यतस्य पंचाग्निमध्ये तपस्यतः तपनोर्कः जातवेदसां अग्नीनां पंचमः पंचानां पूरणः पंचमो जातवेदाः भवतीत्यर्थः विशेषेण सामान्य समर्थनरूपोर्थांतरन्यासः ५१ गुणां तरं च व्यतिरेकेणाह अकृत्वेति उच्चैरुन्नते सुविद्विषां मूर्ध्नि कृहेलया पादमकृत्वा ऽनिधाय अनञ्पूर्वे इति निषेधात्समासेन ल्यबादेशः कीर्तिः कथंकारं कथमित्यर्थः अन्यथै वं कथमित्थं कृ सिद्धाप्रयोगश्चेदिति अनर्थकादेव कृ रोतेः कथंपूर्वात् णमुल् अनालंबा निराधारा द्यां दिवं अधिरोहति न कथंचिदित्यर्थः किंचिन्निश्रेण्यादिकमनाक्रम्यो-

तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते पंचमः पंचतपसस्तपनो जातवेदसां ५१ अकृत्वा हेलया पादमुच्चैर्मूर्धसु विद्विषां कथंकारमनालंबा कीर्तिर्द्यामधिरोहति ५२ अंकाधिरोपितमृगश्चंद्रमा मृगलांछनः केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ५३

त्सोधस्यदुरारोहत्वादिति भावः तस्मात्कीर्तिमिच्छता पुरुषेण पौरुषमेवाश्रयणीयं इति श्लोकतात्पर्यं कीर्तितद्दूतोरभेदोपचारात्समानकर्तृकतानिर्वाहः अत्र प्रस्तुतायाः कीर्तेर्विशेषेण महिम्ना अप्रस्तुतप्रासादारोहकस्त्रीव्यवहारप्रतीतेः समासोक्तिः ५२ पौरुषमेवाश्रयणीयमित्यत्रान्वयव्यतिरेकदृष्टांतमाचष्टे अंकेति अंकः सुत्संग मधिरोपितो मृगो येन स चंद्रमा मृगलांछनः मृगांकः निष्ठुरं कठिनं यथा तथा क्षिप्तो हतः मृगयूथो मृगसमूहो येन सः केसरी सिंहो मृगाधिपः उभयत्रापि उच्यत इति शे षः तस्माच्छत्रौ मार्दवं दुष्कीर्तये पौरुषं तु कीर्तय इति भावः अत्राप्यप्रस्तुतकथनात् प्रस्तुतार्थप्रतीतेरप्रस्तुतप्रशंसा ५३ ७ ७

ननुसामादिसुकरोपायसुपेक्ष्यकिंपाक्षिकसिद्धिनादंडेन यथाह मनुः साम्नादानेनभेदेनसमस्तैरथवापृथक् विजेतुंप्रयतेतारीन्नयुद्धेनकदाचनइति तस्मात्सांत्वमेव सर्ग
युक्तमित्याशंक्यद्वाभ्यांनिराचष्टे चतुर्थोपायेति चतुर्थोपायसाध्येतुदंडसाध्येरिपौसांत्वंसाम सामसांत्वमुभेसमेइत्यमरः अपक्रियाअपकारः तथाहि स्वेद्यंस्वेदा २
र्हंस्वेदेनप्रतिकार्यमित्यर्थः स्वेदस्तुस्वेदनेघर्मइतिविश्वः आमज्वरंअपक्कज्वरंप्राप्य आमस्तुरोगभेदेस्यात्आमोपक्केतुवाच्यवदितिविश्वः कोंभसापरिषिंचति नको

चतुर्थोपायसाध्येतुरिपौसांत्वमपक्रिया स्वेद्यमामज्वरंप्राप्यकोंभसापरिषिंचति ५४
सामवादाःसकोपस्यतस्यप्रत्युतदीपकाः प्रतप्तस्येवसहसासर्पिषस्तोयबिंदवः ५५

पीत्यर्थः ज्वरितस्यांभः सेकवत्क्रुद्धस्यशत्रोःसांत्वमुद्दीपकंस्यात् अतोदंड्यइतिभावः वाक्यभेदेनप्रतिबिंबकरणापेक्षादृष्टांतालंकारः ५४ सामेति सकोपस्य
रूढवैरस्यतस्यचैद्यस्यसामवादाःप्रियोक्तयः सहसाप्रतप्तस्यक्वथितस्यसर्पिषः घृतस्यतोयबिंदवइवप्रत्युतवैपरीत्येनदीपकाः प्रज्वलनकारिणः नतुशांतिक १३
राइत्यर्थःतस्माद्दंड्यएवमनुवचनंत्वमौढवैरिविषयं ५५ ७ ७ ७ ७

एवंस्थिते सति केचिदुद्भवादयो मत्या नचक्षीरन् तान्मत्याह गुणानामिति गुणानां संध्यादीनां आयथातथ्यात् तयात्वमतिक्रम्य वर्तत इति यथातथं यथायोग्यमिति यावत् यथार्थं तु यथातथमित्यमरः यथार्थेऽव्ययीभावः सन्नपुंसकमिति नपुंसकत्वं ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वं ततो नञ्समासे अयथातथं तस्य भावः आयथातथ्यं ब्राह्मणादित्वात् ष्यञ् प्रत्ययः यथातथयथापुरयोः पर्यायेणेति विकल्पान्नञ्पूर्वपदवृद्धिः तस्मादायथातथ्यादयथायोग्यादन्यकालेऽन्यप्रयोगादित्यर्थः अर्थं प्रयोजनं विप्लावयंति निघ्नंति कार्यहानिं कुर्वंतीत्यर्थः अमात्यानां व्यंजनं चिन्हं येषां ते तथोक्ताः तद्वेषधारिण इत्यर्थः अकर्जो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः वस्तुतस्तु शत्रुरिति संज्ञैषां संजाता शत्रुसंज्ञिताः शत्रव एव ते क्रूरमंत्रिणो राज्ञां दूषयितुमर्हा दूष्याः गर्ह्यास्त्याज्या इति यावत् कृत्यानां कर्तरि वेति कर्तरि

गुणानामायथातथ्यादर्थं विप्लावयंति ये अमात्यव्यजना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः ५६ स्वशक्त्युपचये केचित्परस्य व्यसनेऽपरे यान
माहुरुदासीनं त्वासुत्थापयति द्वयं ५७

पष्ठी अतः स्वोक्तं न मतिरोद्धव्यमिति भावः ५६ ननु यातव्योऽपि काले यातव्य इत्याशंक्याथ मेव काल इत्याह स्वशक्तीति केचिद्वृद्धाः स्वस्य शक्त्युपचये स्वसामर्थ्यातिरेके यानं यात्रामाहुः यथाह कामंदकः प्रायेण संतो व्यसने रिपूणां यातव्यमित्येव समादिशंति तथापि पक्षे व्यसनानपेक्षी स्वमोऽद्विषं तं समुदितः प्रतीयादिति अपरे वृद्धाः परस्य शत्रोर्व्यसने विपदि व्यसनं विपदि भ्रंशे इत्यमरः यानमाहुः अत्र मनुः तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोरिति तद्द्वयं उक्तपक्षद्वयं कर्तृ उदासीनमनुयुंजानं ईदास इति शानजाकारस्येकारादेशः त्वा समुत्थापयति प्रेरयति तदुभयलाभादीदृक्कालो न कदापि लभ्यत इति भावः ५७

टी॰ तत्रशान्त्युपचयंतावद्दूरयतीति लिलंघयिषत इति लोकाँल्लंघयितुमिच्छंतो लिलंघयिषतः लंघयतेः सन्नंताल्लुटः शतरिशास् अलंघ्यान् स्वयंदुर्लंघ्यान् कुतः अलघीयसः सर्ग
अतिगुरून् अतएव यादवाः अंभोनिधयइवेत्युपमितसमासः तान् यादवांभोनिधीन् भवतः क्षमातितिक्षावेलेवकूलमिव वेलाकूलेपिवारिधेरितिविश्वः रुंधेम २
तिवभाति अन्यथाप्रागेवसर्वसंहरेयुरिति भावः ५८ अथ्युत्क्रमस्यायमपरोयदक्लेशेनैवतेविजयलाभइत्याह विजयइति सेनायाः कर्त्र्याविजयः साक्षिमात्रेउ
दासीनेएवफलभाजित्वयिसमीस्योक्तेसांख्योक्तेसांख्यंसमीस्यमितित्रिकांडः आत्मनिबुद्धेः महत्तत्त्वस्यमूलप्रकृतेः प्रथमविकारस्यकर्त्र्याः भोगः सुखदुःखा
नुभवइवापदिश्यतांव्यवह्रियतां भृत्यजयपराजययोः स्वामिगामित्वादितिभावः सांख्याअप्याहुः कर्त्तेव भवत्युदासीनइति सर्वभृत्युपभोगं यस्मात्सुरूपस्यसा

लिलंघयिषतोलोकानलंघ्यानलघीयसः यादवांभोनिधीन्रुंधेवेलेव भवतःक्षमा ५८ विजयस्त्वयिसेनायाः साक्षिमात्रेपदिश्यताम्
फलभाजिसमीस्योक्तेबुद्धेर्भोगइवात्मनि ५९ हतेहिडिंबरिपुणाराज्ञिद्वैमातुरेयुधि चिरस्यमित्रव्यसनीसुदमोदमघोषजः ६०

धयतिबुद्धिरितिच ५९ अथपरस्यव्यसनमाह हतइति हिडिंबरिपुणाभीमसेनेनद्वयोर्मात्रोरपत्यंपुमान् द्वैमातुरः मातुरुत्संख्यासंभद्रपूर्वायाइतिअण्प्रत्ययः उकारश्चां
तादेशोरेफपरः तस्मिन्राज्ञिजरासंधेसहिताभ्यांसपत्नीभ्यांअर्धशः प्रसूतोजरयानाम्न्यापिशाच्यासंधितश्चेतिकथयंति युधिहतेसति चिरस्यचिरकालेन चिरायचिररात्रा १४
यचिरस्याद्याश्चिरार्थकाइत्यमरः मित्रव्यसनीमित्रव्यसनवान् मित्रभ्रंशवानितियावत् व्यसनंविपदिभ्रंशइत्यमरः दमघोषाज्जातोदमघोषजश्चैद्यः सुखेनदम्यतइति
सुदमः एकाकित्वात्सुसाध्यइत्यर्थः ६० ७

कष्टश्चायं पक्षोऽभ्युपेत्यवादेनोक्तः वस्तुतस्तु शूराणां अस्माकं अग्रिम पक्ष एवेष्टः शास्त्रसंवादीच यथाह कामंदकः यदासमस्तं मसमर्थं निहंतुं पराक्रमादूर्जितमप्यमित्रं तदाभियायादहितानिकुर्वन्तु पांतन्तः कर्षणपीडनानिइ त्यभिप्रेत्याह नीतिरिति परः शत्रुः आपदिगम्यः गमनार्हः नीतिरितियत् तदायदिगमनंमानिनः शौर्याभिमानव तोह्रियेलज्जाकरमित्यर्थः किंतु पूर्ण उपचितगात्रः स्वशत्रुस्तस्यमानिनोविधुश्चंद्रः विधुंतुदतिहिनस्तिइतिविधुंतुदः राहुः ग्रंथस्वरूपांस्तु दइतिखशप्रत्ययेमुमागमः त स्येवोत्सवाय अतएव बलिनाबलवानेवयातव्यः बलिनश्चवयमितिभावः ६१ तर्हि पूर्वोदाहृतमन्वादिशास्त्रविरोधः स्यादित्याशंक्याह अन्यदिति अन्यदुच्छ्रं

नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवाय सः ६१
अन्यदुच्छृंखलं सत्वमन्यच्छास्त्रनियंत्रितं सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ६२

खलं अनर्गलं असत्व पीडनक्षममिति यावत् सत्वं बलमन्यत् शास्त्रेणमन्वादिशास्त्रेणानियंत्रितं उदाहृतं परव्यसनकालेनिर्मितं सत्व मन्यत् उत्कटानुत्कटत्व लक्षणवैलक्षण्यमन्यशब्दार्थः तयोः सापेक्षत्वनिरपेक्षत्वाभ्यांमियोविरोधान्नैकशास्त्रार्थत्वं संभवतीत्यर्थः अत्रदृष्टांतमाह तेज स्तिमिरयोः समानमधिकरणं ययोस्तयोर्भावः सामानाधिकरण्यं एकाश्रयत्वं कुतः नकुतश्चित्तयोः सहावस्थानविरोधादितिभावः तस्मादुभयोरुदितानुदितहोमवत्भिन्नविषयत्वादितरेतरशा स्त्रविरोधोनबाधकइतिभावः ६२ ७

टी. तर्हि नः किमिदानीं कार्यमत आह इंद्रप्रस्थेति इंद्रप्रस्थस्य पार्थनगरस्य गमो गमनं पहरहर्निर्विघ्नगमम्भ्येत्स प्रत्ययः माकारि तावन्न क्रियतामेवेत्यर्थः यावत्तावत् परिच्छेदेका- स.

स्न्यें मानावधारण इतिविश्वः कृञः कर्मणि लुङ् माङि लुङिरन्याशीरर्थे नमाङ्योग इत्यट्प्रतिषेधः किंतु चेदयः चेदिदेशाः अस्माकमिमे आस्माकाः युष्मदस्मदोरन्यत २

रस्यां खञ्चेति विकल्पादण्प्रत्ययः तस्मिन्नणि च युष्माकास्माकाविति अस्माकादेशः सन्निधिरेव सान्निध्यं स्वार्थे ष्यञ् प्रत्ययः आस्माकानां दंतिनां सान्निध्यात् वामनी

भूताः शाखाभंगात् खर्वीभूताः भूरुहो वृक्षा येषां तेन तथोक्ताः संतु चेदियात्रैव क्रियतामित्यर्थः सा च प्रस्तुतामस्तुतेनैव स्वकार्येण गम्यत इति पर्यायोक्त्यलंकारः कार

इंद्रप्रस्थगमस्तावत्कारि मा संतु चेदयः आस्माकदंतिसान्निध्याद्वामनीभूतभूरुहः ६३
निरुद्धवीवधासारप्रसारा गा इव व्रजं उपरुंधंतु दाशार्हाः पुरीं माहिष्मतीं द्विषः ६४

णं गम्यते यत्र प्रस्तुतात्कार्यवर्णनात् प्रस्तुतत्वेन संबंधात् पर्यायोक्तः स उच्यत इति लक्षणात् ६३ निरुद्धेति किं च दाशार्हाः यादवाः वीवधो धान्यादिप्राप्तिः आसारः सु

हृद्बलं प्रसारस्तृणकाष्ठादेः प्रवेशः धान्यादेर्वीवधः प्राप्तिरासार स्तु सुहृद्बलं प्रसारस्तृणकाष्ठादेः प्रवेश इति वैजयंती तेनिरुद्धा येस्ते न तथोक्ताः अन्यत्र निरुद्धो वीवधानां प

र्याहारापरनाम्नां स्कंधवाह्यसीराधाहरणसाधनभारविशेषाणां आसारप्रसारौ प्रवेशनिर्गमौ येस्ते न तथोक्ताः विवधो वीवधो भारे पर्याहाराध्वनोरपीति हेमचंद्रः व्रजं गोष्ठं व्रज १५

स्या ज्ञो कुलं गोष्ठमिति वैजयंती गा इव माहिष्मतीं पुरीं द्विषः अरीन् उपरुंधंतु व्रजे गा इव माहिष्मत्याम् अरीन् आवृण्वंत्वित्यर्थः दुहियाचिरुधीति द्विकर्मकत्वं तत्र पुरी व्रजावकथितं कर्म

अन्यदीप्सितं कर्म ६४

तर्हि पार्थप्रार्थनायाः काऽगतिरित्याशंक्योपेक्षैवगतिरित्याह यजतामिति पांडवोयुधिष्ठिरोयजतांयागंकरोतु इंद्रः स्वर्गमवतुरक्षतु इनोऽर्कः इनः पत्यौनृपार्कयोरिति मेदिनी तपतुप्रकाशतां वयंद्विषतः अरीन् हनामप्रमारयाम आडुत्तमस्यपिच्चेत्याडागमः सर्वप्रभासत्कालेलोट् तथाहि सर्वोजनः स्वार्थेप्रयोजनंसमीहते अनुसंधत्ते इंद्रादिसमानयोगक्षेमोनः पार्थइत्यर्थः अर्थांतरन्यासः ६५ प्राप्यतामिति किंचद्विषतांशिरश्छेदेनप्रोच्छलताउच्छलताशोणितेनोक्षितैः सिक्तैः शस्त्रैरर्करोचिषांसंपर्कात्संबंधाद्विद्युतांसंपल्लक्ष्मीः प्राप्यतामितिनिदर्शनालंकारः ६६ इतीति इतीत्थंसंरंभिणः क्षुभितस्यबलस्यबलभद्रस्यवाणीरालेख्यदेवताः चित्रलिखितदेवताः सभायाः

यजतांपांडवः स्वर्गमवत्विंद्रस्तपत्विनः वयंहनामद्विषतः सर्वः स्वार्थंसमीहते ६५ प्राप्यतांविद्युतांसंपत्संपर्कादर्करोचिषां शस्त्रैर्द्विष
च्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः ६६ इतिसंरंभिणोवाणीर्बलस्यालेख्यदेवताः सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ६७
निशम्यताः शेषगवीरभिधातुमधोक्षजः शिष्यायबृहतांपत्युः प्रस्तावमदिशद्दृशा ६८

सदोगृहस्यभित्तीनांप्रतिध्वानैः प्रतिध्वनिव्याजेनेत्यर्थः भयादन्ववदन्ननुमोदयन्निवेत्युत्प्रेक्षा ६७ निशम्येति अधः कृतमक्षजमिंद्रियजंज्ञानंयेनसोधोक्षजः हरिस्ताः शेषस्यशेषावतारस्यबलभद्रस्यगाः वाचः शेषगवीः गोरतद्धितलुकीतिटच् टित्वान्ङीप् निशम्यश्रुत्वा निशाम्यतीतिश्रवणेतथानिशमयत्यपिइतिभट्टमल्लः तत्रशाम्यतेरिदंरूपं अन्यथानिशमय्येतिस्यात् अतएववामनः निशम्यनिशमय्यशब्दौप्रकृतिभेदादिति बृहतांवाचांपत्युः बृहस्पतेस्तस्यशिष्यायोद्धवायअभिधातुंवक्तुं दृशादृक्संज्ञयाप्रस्तावमवसरमादिशत् अतिसृष्टवान् प्रस्तावः स्यादवसरइत्यमरः ६८

टी. भारतीमिति अथ कृष्णाभ्यनुज्ञानंतरं उद्धवः आहितोऽभरोऽर्थगौरवं यस्यां सा तां तथ्यां यथार्थां भारतीं वाचं अनुद्धतम् अगर्वितं यथा तथा गदस्याग्रजं कृष्णं अग्रे पुरत इति प्रा स.
गल्भ्योक्तिः उतथ्यस्य महर्षेरनुजो बृहस्पतिः उतथ्यावरजो जीव इति विश्वः तद्वत्तेन तुल्यं जगाद तेन तुल्यं क्रियाचेद्वतिरिति वतिप्रत्ययः तद्धितगतेयमुपमा ६९ किं जगादेत्य २
त आह संप्रतीति संप्रति सुशलपाणिना बलभद्रेण केवलं शूरेणेति ध्वनिः उक्ते सति वक्तुं असांप्रतम् अयुक्तं असाधूक्तत्वात् अभ्यासे समानयोगक्षेमप्रसंगादिति ध्वनिः सां
प्रतशब्दस्यार्हार्थत्वात् तद्योगे शकधृषेत्यादिना तुमुन् तथाहि लेख्येन पत्रेणार्थे वाच्ये निर्धारिते निर्णीते सति वाचिकं व्याहृतार्थां वाचं संदेशवचनमित्यर्थः संदेशवाग्वा

भारतीमाहितभरामथानुद्धतमुद्धवः तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजम् ६९
संप्रत्यसांप्रतं वक्तुमुक्ते मुशलपाणिना निर्धारितेऽर्थे लेख्येन खलूक्त्वा खलु वाचिकं ७०

चिकं स्यादित्यमरः वाचो व्याहृतार्थायामिति ठक् उक्त्वा खलु न वाच्यं खल्वित्यर्थः खल्वाद्यः प्रतिषेधे अन्यो वाक्यालंकारे निषेधवाक्यालंकारे जिज्ञासानुनये खलु इत्युभ
यत्राप्यमरः अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वाप्रत्ययः इह न घादादौ खल्वादयः इति निषेधस्योद्वेजकाभिप्रायत्वात् न अर्थः खलुशब्दस्यानुद्वेजकत्वान्न अपदे वपा
दादौ प्रयोगेन दूष्येत इत्यनुसंधेयं लिखितार्थे वाचिकमिव वलोक्तेः मदुक्तेरनवकाश इति वाक्यप्रतिबिंबकरणात् स्पष्टस्ताव दृष्टांतः स्तुतिव्याजेन निंदावगमात् व्याज १६
स्तुतिश्च तल्लक्षणं त्वग्रे वक्ष्यामः ७०

७ ७ ७ ७ ७

किंतर्हितूष्णींभूतेननेत्याह तथापीति तथापि बलेननिर्णीतेपिते तवमय्यपिबलमद्र इत्यपि शब्दार्थः गुरुरित्येवयज्ञैरवंआदरस्तज्ञैरवंजल्पतोजल्पनप्रयोज्यकर्मणोममप्र
योजककर्तृत्वंप्रेरकत्वंउपैति अतोवक्ष्यामीत्यर्थः नहिपंडितैः सादरंपृष्टस्यविशेषज्ञस्याज्ञवत्तूष्णींभावोयुक्तइतिभावः ७१ ननुरामेणैवसर्वंप्रपंचेनोक्तंसंप्रतिकिंतेवाच्यमस्ती
त्याशंक्यतथाप्रपंचोयमितिहृदिनिधायस्तुवन्नाह वर्णैरित्यादित्रयेण कतिपयैः परिमितैः वर्णैः पंचाशतैवमातृकाक्षरैः कतिपयैः सप्तभिरेवस्वरैर्निषादादिभिः ग्रथितस्य
गुंफितस्यवाङ्मयस्यशब्दजालस्य एकारोनित्यंमयडभिछंतिइतिस्वार्थेमयट् गीयतइतिगेयंतस्यगानस्येवविचित्रतारचनाभेदादनंताअपरिमिताभवतीत्यर्थः अहो

तथापियन्मय्यपितेगुरुरित्यस्तिगौरवं तत्प्रयोजककर्तृत्वमुपैतिममजल्पतः ७१
वर्णैःकतिपयैरेवग्रथितस्यस्वरैरिव अनंतावाङ्मयस्याहोगेयस्येवविचित्रता ७२
बह्वपि स्वेच्छयाकामंप्रकीर्णमभिधीयते अनुज्झितार्थसंबंधःप्रबंधोदुरुदाहरः ७३

अतस्तेनसाधूक्तेपिविशेषानंत्यात्ममापिवक्तव्यमस्तीत्येकोभावः तस्यदुरुक्तत्वान्ममैवास्तीत्यन्यः प्रत्यवयवमिवोपादानादनेकैवेयमुपमास्वरः शब्दे। विषड्जादा
वितिहेमचंद्रः ७२ बह्वीति स्वेच्छयास्वमतिप्रानुसारेणप्रकीर्णमसंगतंबह्वपिकामंयथेष्टमभिधीयते किंतुअनुज्झितोर्थसंबंधः पदार्थसंगतिर्यस्मिन्सप्रबंधःसं
दर्भःदुरुदाहरोदुर्वचः हरतेःखल्प्रत्ययः रामेणतुसंगतमेवोक्तंइतिस्तुतिः असंगतमेवोक्तमितिनिंदाचापगम्यते ७३ ७ ७ ७

मदीयसीमिति कुशला: वक्तारोमदीयसीमतिसुकुमाराक्षरांश्लक्ष्णतरांतथापि घनामर्थगुर्वी अन्यत्रसार्द्रांकदलीदलकल्पामित्यर्थ: अनल्पैर्बहुभिर्गुणै: श्लेषादिभिस्तं तुभिश्चकल्पितांरचितांनिर्मितांचित्रांचित्ररूपांचवाचंपटीशाटीमिवविस्तारयंति प्रसारयंति रामरामभ्यैर्वंविधेतिस्तुति:रामवाकृतुनैवंविधेतिनिंदाचगम्यते अत्रश्लेष स्यशुद्धविषयासंभवेन सर्वालंकारबाधकत्वादुपमामतिभोत्थापित: प्रकृताप्रकृतश्लेषोपमित्यलंकारसर्वस्वकार: एवंचपूर्णोपमायानिर्विषयत्वप्रसंगात् श्लेषप्रतिभो

मदीयसीमपिघनामनल्पगुणकल्पितां विस्तारयंतिनिपुणाश्चित्रांवाचंपटीमिव ७४
विशेषविदुष:शास्त्रंयत्तवोद्ग्राह्यतेपुर: हेतु:परिचयस्थैर्येवक्तुर्गुणनिकैवसा ७५

त्थापितेयमुपमैवेत्यन्ये ७४ अथोद्धव: स्वसिद्धांतंवर्णयिष्यन् स्तुत्यागर्वंपरिहरन्हरिमभिमुखीकरोति विशेषेति विशेषंवेत्ति विशेषविद्वान् तस्यविशेष विदुष:विशेषज्ञस्यागतिगम्यादिपाठात् द्वितीयासमास: तवपुरोग्रेशास्त्रंनीतिशास्त्रं उद्ग्राह्यते उपन्यस्यतइतियत् उद्ग्राहितमुपन्यस्तंइतिवैजयंती सातदुद्ग्रह णमित्यर्थ: विधेयप्राधान्यात्स्त्रीलिंगत्वंवक्तुरुद्ग्राहयितु: परिचयस्थैर्येअभ्यासदार्ढ्येहेतुर्गुणनिका आम्रेडितमाम्नातमेवेतियावत् नतुवैदुष्यप्रकटनमितिभाव: १७
गुणआम्रेडने चौरादिकात् ण्यासश्रंथोयुगितियुच्ततत:संज्ञायांकन्कात्पूर्वपदस्येकार: ७५ ७ ७ ७

संमतिस्वमतमुपन्यस्यति प्रज्ञेति अतोस्मात्कारणात् स्वमस्यास्तीतिस्वामी प्रभुः स्वामिन्नैश्वर्ये इतिनिपातः प्रज्ञोत्साहौ मंत्रोत्साहशक्ती आत्मनि स्वस्मिन्नाधातुं संपादयितुं यतेत स्वयमुभयशक्तिमान् भवेत् इत्यर्थः कुतः हि यस्मात्तौ प्रज्ञोत्साहौ उदेष्यंत्यावर्त्स्यंत्याजिगीषोरात्मनः संपदः प्रभुशक्तेर्मूलं निदानं अत्रोत्साहग्रहणं हष्टांतार्थं यथोत्साहस्तथामंत्रोपिग्राह्योनतुकेवलोत्साह इति बलभद्रस्यापवादः ७६ उत्साहवत् प्रज्ञापिग्राह्येत्युक्तं तस्याः प्रयोजनमाह सोपधानामिति ये धीराः धीमंतः सोपधानां सविशेषां युक्तियुक्तामित्यर्थः अन्यत्र सगेंदुकां सोपबर्हामित्यर्थः उपधानां विशेषे स्याच्चगेंदुके प्रणयेपिचेति विश्वः स्थेयसीं स्थिरतरां अचपलां द्रढीयसीं च स्थिरशब्दादीयसुनि प्रियस्थिरेत्यादिनास्थादेशः धियं खट्वयंति खट्वां पर्यंकं कुर्वंति आश्रयंतीत्यर्थः शयनं मंच पर्यंक पल्यंकाः खट्वया समा इत्यमरः तत्करोति तदाचष्ट इति णिच् धीरास्तत्र धीखट्वायां अनिशं अश्रांतं निषण्णाः विश्रांताः संतो जातु कदाचिदपि श्रमं खेदं न जानते न विदंति श्रमः खेदो स्यादेरितिलक्षणं धीपूर्वक एवोत्साहः सन् नतु केवल इति सर्वथा धीराश्रयणीयेत्यर्थः तत्र धियः आरोप्यमाणायाः प्रकृत श्रमापनोदरूपोपकारपर्यंततया परिणामालंकारः आरोप्यमाणस्य प्रकृतोपियोगित्वे परिणाम इति लक्षणात् ७७

प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि तौ हि मूलमुदेष्यंत्याजिगीषोरात्मसंपदः ७६
सोपधानां धियं धीराः स्थेयसीं खट्वयंति ये तत्रानिशं निषण्णास्ते जानते जातु न श्रमं ७७

७ ७ ७ ७ ६

अथप्राज्ञाप्रज्ञयोर्द्वाभ्यांवैषम्यमाह स्पृशंतीति तीक्ष्णाः निशिताः प्रज्ञाः शरवच्छरेणतुल्यंस्तोकंस्वल्पमेवस्पृशंतिअंतःकार्यस्यांतरंविशंतिचअल्पायासेन बहुकार्यं साधयंतीत्यर्थः बहुस्पृशाव्यापिनास्थूलेनमंदेन बृहताचाश्मनायंत्रोपलेनतुल्यमश्मवत् तेनतुल्यंक्रियाचेष्टितिः बहिरेवंकार्यस्याकार्यस्यचेतिभावः स्थीयते

स्पृशंतिशरवत्तीक्ष्णाः स्तोकमंतर्विशंतिच बहुस्पृशापिस्थूलेनस्थीयतेबहिरश्मवत् ७८

आरभंतेल्पमेवाज्ञाः कामंव्यग्राभवंतिच महारंभाः कृतधियस्तिष्ठंतिचनिराकुलाः ७९

स्थितिः क्रियतेमूढोस्वल्पस्यहेतोः बहुप्रयासंकरोति मूषकग्रहणायशिखरिखननं परिहासास्पदंभवतीतिभावः तद्धितगतेयस्तुपमा ७८ आरभंतइति किंच अज्ञाः अल्पंतुच्छमेवार्थमारभंतेप्रक्रमंतेकाममत्यंतंव्यग्रास्त्वरिताश्चभवंतिनचपारंगच्छंतीतिभावः कृतधियः शिक्षितबुद्धयस्तेमहारंभामहोद्योगाभवंति निराकुलाअव्यग्राश्चभवंतिपारंगच्छंतीतिभावः ७९ १८

७ ७ ७ ७

अथ प्रज्ञावानपिन प्रमाद्येदित्याह उपायमिति उपायमास्थितस्य प्राप्तस्यापिउपायेनैवकार्यंसाधयतोपीत्यर्थः किंस्रुतव्यग्रतयेतिभावः प्रमाद्यतोनवधानस्य प्रमादो
नवधानतेत्यमरः अर्थाः प्रयोजनानिनश्यंतितथाहिशयालुर्निद्रालुः आलुर्विशीङोग्रहणादालुच्मृगान्यातीतिमृगयुः व्याधः मृगय्वादयश्चेत्यौणादिकोयुप्रत्ययां
तोनिपातः व्याधोमृगवधाजीवोमृगयुर्लुब्धकोपिसइत्यमरः उपशेतेस्मिन्नितिउपाशयोमार्गस्यायिनोव्याधस्यात्मगुप्तिस्थानंगर्तविशेषः एरजित्यच्प्रत्ययः तत्र
तिष्ठतीत्युपशयस्थोपिमृगान्नहंति विशेषेणसामान्यसमर्थनरूपोर्थांतरन्यासः ८० एवंप्रज्ञायाआवश्यकत्वमुक्तं तथोत्साहस्याप्याह उदेतुमिति जेतुमिच्छुः जिगीषुः
एकएवद्वादशस्वपिराजसुशत्रुषुमध्येद्वादशस्वादित्येषुदिनकृत् योदिनकरणेव्याप्रियमाणआदित्यःसइवेहाप्युत्साहमत्यजन्प्रयुंजानएवनतुनिरुद्योगइतिभावःउदे

उपायमास्थितस्यापिनश्यंत्यर्थाःप्रमाद्यतः हंतिनोपशयस्थोपिशयालुर्मृगयुर्मृगान् ८० उदेतुमत्यजन्नीहांराजसुद्वादशस्वपि जिगीषु
रेकोदिनकृदादित्येष्विवकल्प्यते ८१

तुंकल्प्यतेउदयायप्रभवतिउत्साहशक्तिरेवप्रभुशक्तेरपिमूलमित्यर्थः नानालिंगत्वाद्धेतूनांनानासूर्यत्वमितिश्रुतेः प्रति
मासमादित्यभेदात्द्वादशत्वंतच्चैकस्यैवद्वादशात्मकत्वंद्वादशात्मादिवाकरइत्यभिधानात् तेचार्यमादयःपुराणोक्ताःद्रष्टव्याःराजानस्तु अरिर्मित्रमरेर्मित्रंमित्रमित्रमतःपरं
तथारिमित्रमित्रंचविजिगीषोःपुरःसराः पंचेतिशेषः पार्ष्णिग्राहस्ततःपश्चादाक्रंदस्तदनंतरं आसारावनयोश्चैवविजिगीषोस्तुपृष्ठतः पार्ष्णिग्राहासारआक्रंदासारश्चेत्यर्थः
अत्रचत्वारइतिशेषः एवंनवप्रभवंति विजिगीषुर्दशमः अरेश्चविजिगीषोश्चमध्यमोभूम्यनंतरःअनुग्रहेसंहतयोः समर्थोव्यस्तयोर्वधे मंडलाद्बहिरेतेषामुदासीनोबलाधिकः अनुग्रहेसं
हतानांव्यस्तानांचवधेप्रभुरिति भूम्यनंतरमध्यमौमध्यमोदासीनाभ्यांसहद्वादशावेदितव्याः पूर्णोपमा ८१

उपायमास्थितस्येत्यत्रराजानप्रमाद्येदित्युक्तं अथप्रमादप्रकारमाह बुद्धिशस्त्रइति बुद्धिरेवशस्त्रंयस्यसः बुद्धिशस्त्रः अमोघपातित्वात्तस्याइतिभावः प्रकृत
यः स्वाम्यादिराज्यांगानि राज्यांगानिप्रकृतयइत्यमरः ताएवांगानियस्यसः प्रकृत्यंगः तद्वैकल्येच राज्ञोवैकल्यंस्यादितिभावः घनादुर्भेदा संहतिर्मंत्ररुप्तिरेववं
चुकः कवचोयस्यसतथोक्तः मंत्रभेदेराज्यभेदः स्यादितिभावः चरतीतिचरः पचाद्यच् सएवचारो गूढपुरुषः प्रज्ञादित्वात्स्वार्थिकोण्प्रत्ययः चारश्चगूढपुरु
षइत्यमरः सएवचक्षणंचक्षुर्यस्यसचारेक्षणः अन्यथास्वपरमंडलवृत्तांतादर्शनादंधस्येवांधलग्नस्यपदेपदेविनिपातः स्यादितिभावः दूतः संदेशहरः स्यात्संदेशह

बुद्धिशस्त्रः प्रकृत्यंगोघनसंवृतिकंचुकः चारेक्षणोदूतमुखः पुरुषः कोपिपार्थिवः ८२

रोदूतइत्यमरः सएवमुखंवाक्यस्यासौदूतमुखः अन्यथामूकस्येववाग्व्यवहारासिद्धेर्नतत्साध्यासाध्यकार्यप्रतिबंधः स्यादितिभावः एवंभूतः पार्थिवः कोपि
पुरुषःअन्यएवायंलोकविलक्षणः पुमानित्यर्थः अतोराज्ञाबुद्ध्यादिसंपन्नेनभवितव्यं एवदेवाप्रमत्तत्वं अन्यथास्वरूपहानिः स्यादितिभावः अत्रकोपिइतिराज्ञो
लोकसंबंधेपितदसंबंधोक्त्यातद्रूपातिशयोक्तिः साचबुद्धिशस्त्रइत्यादिरूपकनिर्व्यूढेतितेनसहांगांगिभावेनसंकरः ८२ ७ ० ७ १९

चतुर्थोपायसाध्यइत्यादिनायत्क्षान्तमेवकर्तव्यमुक्तं तत्रोत्तरमाह तेजइति कालंजानातीतिकालज्ञः तस्यायंकालइतिविद्वुषइत्यर्थः आतोनुपसर्गेकः नत्विगुप
धेत्यादिनाकविधिः समासेकर्मोपपदस्यैवबलवत्त्वभाषणात् तस्यमहीपतेः तेजः क्षान्तमेवेतिवाक्षमैववा एकांतंनियमोनास्ति किंतुयथाकालमुभयमप्याश्र
यणीयमित्यर्थः तथाहिरसान्शृंगारादीन्भावान्निर्वेदादींश्चवेत्तियस्तस्यरसभावविदः भावग्रहणंसंपातायातं कवेः कवितुरेकंकेवलमोजः प्रौढप्रबंधत्वंवा
एकः प्रसादः सुकुमारप्रबंधत्वंवानकिंतुतत्तद्रसानुगुण्येनयथायोग्यमुभयमप्युपादेयं दृष्टांतालंकारः ८३ यदुक्तंक्रियासमभिहारेणविराध्यंतंसहेतकइतित

तेजः क्षमावानैकांतं कालज्ञस्यमहीपतेः नैकमोजः प्रसादोवारसभावविदः कवेः ८३
कृतापचारोपिपरैरनाविष्कृतविक्रियः असाध्यः कुरुतेकोपंप्राप्तेकालेगदोयथा ८४

त्रोत्तरमाह कृतापचारइति परैः शत्रुभिः कृतः अपचारः अपकारोऽपथ्यंचयस्यसतथापि अनाविष्कृतविक्रियः अंतर्गूढविकारः अतएवासाध्योऽप्रति
समाधेयः सन्गदोयथारोगइव इववद्वायथाशब्दइतिदंडी कालेबलक्षयावसरेप्राप्तेसतिकोपंकुरुतेप्रकुप्यतीत्यर्थः तदुक्तं वहेदमित्रंस्कंधेनयावत्का
लविपर्ययः तमेवचागतेकालेभिंद्याद्घटमिवाश्मनिइति ८४ ७ ७ ७ ७

टी॰ इतश्चक्षंतव्यमिदानींइत्याह मृद्विति मृदुना मृदुवस्तुना व्यवहितमंतर्हितंतेजः अर्थान् भोक्तुंप्रकल्पतेप्रभवति तथाहि प्रदीपोभ्यंतरस्थयामध्य सर्ग॰
स्थयादशयावर्त्यादशावर्तावस्थायांस्नेहस्तैलादिकेरसइतिविश्वः स्नेहंतैलादिकमर्थमादत्ते अन्यथास्वयमेवनिर्वायादितिभावः क्षांतिपूर्वकमेवक्षात्रं २
फलतीतिसर्वथाप्रथमंक्षंतव्यमितिभावः विशेषणसामान्यसमर्थनादर्थांतरन्यासः ८५ तर्हिपौरुषंमाभून्नित्यंक्षममाणस्यदैवमेवश्रेयोविधास्य
तीत्याशंक्याह नालंबतइति विद्वानभिज्ञः दिष्टेमतिर्यस्येतिदैष्टिकः दैवप्रमाणकइत्यर्थः दैवंदिष्टंभागधेयमित्यमरः अस्तिनास्तिदिष्टंमतिरिति

मृदुर्व्यवहितंतेजोभोक्तुमर्थान्प्रकल्पते प्रदीपःस्नेहमादत्तेदशयाभ्यंतरस्थया ८५
नालंबतेदैष्टिकतांननिषीदतिपौरुषे शब्दार्थौसत्कविरिवद्वयंविद्वानपेक्षते ८६

ठक् तद्भावंदैष्टिकतातामेवनालंबते सर्वथायद्भविष्यस्यविनाशादितिभावः तथापौरुषेकेवलपुरुषकारेपिसुवादित्वादण्प्रत्ययः ननिषीदतिन
तिष्ठति दैवप्रातिकूल्ये तस्यवैफल्यादितिभावः किंतुसत्कविः सत्कविताशब्दार्थाविव तयोःकाव्यशरीरत्वादितिभावः यथाहवामनः अदोषौ २०
सगुणौसालंकारौशब्दार्थौकाव्यमिति द्वयंपौरुषंदैवंचापेक्षते अतःपौरुषमप्यवश्यमेवतत्तत्कालेकर्तव्यमितिविशेषः पौरुषादृष्टयोःपरस्परसापेक्षत्वादितिभावः
८६

अथक्षांतेः फलमाह स्थायिनइति रस्यतेस्वाद्यतइतिरसः शृंगारादिः रसनेस्वादनार्थत्वात्रस्यंतइतिरसाइतिनिर्वचनात् तस्यरसस्यरसांतरतः स्थायिनः स्था
यिभावस्यरसादेः रतिर्हासश्चशोकश्चक्रोधोत्साहभयानिच जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः इत्युक्तत्वादेकस्यैवार्थेस्वादुभावरूपे प्रयोजनेभू
यांसः संचारिणोव्यभिचारिणोभावाः निर्वेदादयः विभावादीनामुपलक्षणमेतत् तद्यथाप्रवर्तंते तदुक्तं विभावैरनुभावैश्चसात्विकैर्व्यभिचारिभिः आनीयमा
नः स्वादुत्वंस्थायिभावोरसः स्मृतइति तथापिस्थायिनः स्थिरस्यक्षांत्याकालं प्रतीक्षमाणस्येत्यर्थः तस्यैकस्यनेतुर्जिगीषोर्नायकस्यार्थेप्रयोजनेभूयांसोमही

स्थायिनोर्थेप्रवर्तंतेभावाः संचारिणोयथा रसस्यैकस्यभूयांसस्तथानेतुर्महीभृतः ८७ तंत्रावापविदायोगैर्मंडलान्य
धितिष्ठता सुनिग्रहानरेंद्रेण फणींद्राइवशत्रवः ८८

भृतः राजानः प्रवर्तंते स्वयमेवतस्यकार्यंसाधयंतीत्यर्थः ततः क्षंतव्यमिति
भावः केचित्तुभावपदस्यापिरसपरत्वमाश्रित्ययथासंचारिणः प्रसंगादागंतुकाः अन्येरसास्थायिनः स्थिरस्यैकस्यमुख्यस्यार्थेप्रवर्तंतेयथास्मिन्नेवकाव्ये
वीरश्शृंगारादयइतिव्याचक्षते उपमालंकारः ८७ क्षांतिपक्षएवगुणांतरमाह तंत्रेति तंत्रावापौस्वपरराष्ट्रचिंते अन्यत्रतंत्रावापंशास्त्रौषधप्रयोगंच वेत्तियः
तेनतंत्रावापविदा तंत्रस्वराष्ट्रचिंतायामावापः परचिंतने शास्त्रौषधांतमुख्येषुतंत्रमितिवैजयंती योगैः सामाद्युपायैः अन्यत्रदेवताध्यानैश्च योगः संह
ननोपायध्यानसंगतियुक्तिषित्यमरः मंडलानिस्वपरराष्ट्राणिमाहेंद्रादिदेवतायतनानिचअधितिष्ठता आक्रमतानरेंद्रेणराज्ञाविषवैद्येनच नरेंद्रोवार्तिकेरा-

त्विषि पर्षद्येपि कथ्यतइतिविश्वः शत्रवः फणींद्राः सर्पाइवस्तुनिग्रहाः करवेनानिग्राह्याः एवंचप्रकृताप्रकृतविषयः श्लेषउपमैवेतिकेचित् ८८ प्रज्ञोत्साहावतः स्वामीत्यतेवै तावेवप्रभुशक्तेर्मूलमित्युक्तं तदेवव्यनक्ति करेति उत्तुंगोमहोन्नतः प्रज्ञाबलंमंत्रशक्तिरेव बृहत्प्रधानंमूलंयस्यसउत्साहएवपादपः करेणबलिनामप्रचेयांवर्धनीयांहस्तग्राह्यांच बलिहस्तांशवः कराइत्यमरः प्रथीयसींपृथुतरां रकृतोर्हलादेरितिरेफादेशः प्रभुशक्तिंतेजोविशेषं सप्रभावः प्रतापप्रयत्तेजः कोशदंडजमित्यमरः फलतिप्रसूतइत्यर्थः फलनिष्पत्तौ मंत्रपूर्वकएवोत्साहःस्यात् विपरीतस्तुछिन्नमूलोवृक्षइवशुष्यतीतिभावः रूपकालं-

करप्रचेयामुत्तुंगः प्रभुशक्तिंप्रथीयसीं प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ८९
अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरेस्वराः विजिगीषोर्नृपतयः प्रयांतिपरिवारतां ९०

कारः ८९ विमृश्यकारिणस्तुविश्वमपिविधेयंस्यादितित्रयेणाह अनल्पेति अनल्पत्वात्प्रज्ञोत्साहाधिकत्वादतएवप्रधानत्वान्मंडलाभिज्ञत्वात् अन्यत्रानल्पत्वादुच्चैस्तरत्वात्प्रधानत्वान्नायकस्वरत्वाच्चवंशस्यवंशवाद्यस्वरस्यइतरेस्वरावीणागानादिशब्दाइवअथवाआश्रयत्वाद्वंशइववंशस्तत्कालविहितः स्वरउच्यते तस्यस्वरस्यइतरेस्वराः षड्जादयइवविजिगीषोर्नृपतयः अन्येमंडलपरिवर्तिनोराजानः परिवारतांपोष्यतांप्रयांति तत्कार्यमेवसाधयंतीत्यर्थः तस्माद्विमृश्यकर्तव्यमित्यर्थः ९०

अपीति किंच अनारभमाणस्य स्वयमकिंचित्कुर्वाणस्यापि विभोः प्रभोः व्यापकस्य च परैरन्यैर्नृपतिभिः शंखभेर्यादिभिश्चउत्पादिताः संपादिताः ज
निताश्चार्थाः प्रयोजनानि विहायसः आकाशस्य शब्दाइव गुणतां विशेषतां कारणत्वाद्गुणत्वं भ्रजंति शक्तो हि राजा स्वयमुदासीन एवाकाशवत्स्वमहि
म्नैव कार्यदेशं व्याप्नुवन् शब्दानिव सर्वार्थानपि स्वकीयतां नयतीत्यर्थः गुणस्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतंतुषु इति वैजयंती ९१ यातव्येति किंच एका
र्थ एकप्रयोजनं स एव तंतुः सूत्रं तत्र प्रोतायां एकार्थाभीष्टाभिलाषिण्यामित्यर्थः प्रपूर्वाद्वेञः कर्मणि क्तः वचिस्वपीत्यादिना संप्रसारणं यातव्योभिषेणयितव्यः अ

अप्यनारभमाणस्य विभोरुत्पादिताः परैः । व्रजंति गुणतामर्थाः शब्दाइव विहायसः ९१
यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः । एकार्थतंतुप्रोतायां नायको नायकायते ९२

रिः पार्ष्णिं गृह्णातीति
पार्ष्णिग्राहः पृष्ठानुधावी कर्मण्यण् तौ आदी येषां ते पूर्वोक्ताः पंक्तिशः स्थिताः त एव मालारत्नावलिका तस्यामधिकद्युतिर्महातेजाः नायकः शक्तिसंपन्नो जि
गीषुर्नायकायते मध्यमणिरिवाचरति स्वयमेव सर्वोत्कर्षेण वर्तत इत्यर्थः तस्माद्विमृश्य कर्तव्यमिति भावः नायको नेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः
उपमानादाचार इति क्यङ् अकृत्सार्वधातुकयोरिति दीर्घः नायकायत इत्युपमा अन्यथा शास्त्रविरोधात् एकार्थतंत्वित्यत्र तु रूपकत्वे अधिष्ठानतिरोधानत्वे
नारोप्यमाणतंतुत्वस्यैवोदाहृतत्वात्प्रोतत्वसिद्धेस्तदेवयुक्तं तद्वलात्पार्ष्णिग्राहादिमालायामित्यत्रापि रूपकमेव तदनुप्राणिता चेयमुपमेत्यंगांगिभावेन संकरः ९२ ६७

माघ.टी. २२

अथविमृश्यकारिणःप्रकारमाह षाड्गुण्यमिति जिगीषुः शक्तिंप्रभावादित्रयंबलंवापेक्षतइतिशक्त्यपेक्षः सन् प्रभावाद्यन्तु शक्तिर्बलेप्रभावादावितिविश्वः ष स.

ड्गुणाएवषाड्गुण्यंसंधिविग्रहादिषट्कं चातुर्वर्ण्यादित्वात्स्वार्थेष्यञ्प्रत्ययः तदेवरसायनमौषधविशेषमुपयुंजीत सेवेतरसायनंविहंगेपिजराव्याधिभि २

दौषधइतिविश्वः एवंसति अस्यप्रयोक्तुरंगानिस्वास्म्यादीनिगात्राणिच स्थास्नूनिस्थिराणिकालांतरक्षमाणीत्यर्थः ग्लाजिस्थश्चेतिक्स्नुः बलवंतिपरपी

डाक्षमाणिचभवंतिश्लिष्टपरंपरितरूपकं ९३ स्थानइति किंचस्थानेशक्यविषयेशमवतांक्षमावतांअंगिनांसप्तांगिनांराज्ञांशरीरिणांचशक्त्याप्र

षाड्गुण्यमुपयुंजीतशक्त्यपेक्षोरसायनं भवंत्यस्यैवमंगानिस्थास्नूनिबलवंतिच ९३
स्थानेशमवतांशक्त्याव्यायामेवृद्धिरंगिनां अयथाबलमारंभोनिदानंक्षयसंपदः ९४

भावाद्यनुसारेणबलेनचव्यायामेव्यापारेषाड्गुण्यप्रयोगेगमनादौचसतीत्यर्थः वृद्धिरुपचयेराज्यस्यशरीरस्येचेतिभावः विपक्षेबाधकमाह अयथाबलंश

क्त्यतिक्रमेण यथासादृश्यइत्यव्ययीभावेनञ्समासः आरंभोव्यायामः क्षयसंपदोत्यर्थहानेर्निदानं आदिकारणं अंगानामितिभावः तस्मादस्मात्क्रमकस्माच्चे २२

ष्टास्कंदनमश्रेयस्करमितिभावः अत्रविशेषस्यापिश्लिष्टत्वात्शब्दशक्तिमूलोवस्तुनावस्तुध्वनिः अतोद्दयानामंगिनांऔपम्यंचगम्यतइतिशेषः ९४ ७

फलितमाह तदिति तत्तस्मादशक्यार्थस्य अकार्यत्वात्रेदीनामीशितारंतंशिशुपालंभवान्मावमंस्तनावमन्यस्य मन्यतेर्माङिलुङ् अनुदात्तत्वान्नेडागमा भावः कुतः यश्चैद्यउदात्तः स्वरान् अनुदात्तानिवारीनेकपदे एकस्मिन्पदन्यासेसुप्तिङंतपदलक्षणेच निहंतिहिनस्तिनीचैःकरोतिच अतिशूरत्वात् अनुदात्तंपदमेकवर्ज्यमितिपरिभाषाबलाच्चेतिभावः ९५ नचायमेकाकीकिन्नःकरिष्यतीतिमंतव्यमित्याह मावेदिति असौचेदिराट् एकःएकाकी अतोजेतव्यः सुजयइतिमावेदिमाज्ञासीः वत्तेःकर्मणिमाङिलुङ् यद्यस्मात्सचेदिराट् राज्ञश्चंद्रस्ययक्ष्मा राजाचासौयक्ष्मेतिवाराजयक्ष्माक्षयरोगो रोगाणामि

तदीशितारंचेदीनांभवांस्तमवमंस्तमां निहंत्यरीनेकपदेयउदात्तःस्वरानिव ९५
मावेदियदसावेकोजेतव्यश्चेदराडिति राजयक्ष्मेवरोगाणांसमूहःसमहीभुजां ९६

व महीभृतांसमूहः समष्टिरूपः यथाहवाग्भट्टः अनेकरोगानुगतो बहुरोगपुरोगमः राजयक्ष्माक्षयःशोषोरोगराडितिचस्मृतः नक्षत्राणांद्विजानांचराजाभूद्यदयंपुरा यत्र राजाराजयक्ष्मारोगाणांचततोमनइति अतोयंदुर्जयइतिभावः एतेनचिरस्यमित्रव्यसनीस्फदमोदमघोषजइतिनिरस्तं ९६

अथास्य सर्वराजसमष्टितामेव द्वाभ्यामाचष्टे संपादितेति संपादितफलंलाभः शराग्रं च यस्य सः फलंलाभशराग्रयोरितिविश्वः सपक्षः ससुहृत् कंकादिपत्रयुक्तश्च परेषां भेदनः शत्रुविदारिणः बाणोबाणासुरः शरश्च गुणिना शौर्यादिगुणवता अधिज्येन च तेन चैद्येन कर्मणेप्रभवतीति कार्मुकं कर्मणेउकञ् तेनेव संधानं संधिमेष्यति अतोनैकाकीतिभावः अत्राप्युपमाश्लेषोवामतभेदात् ९७ येचेति किंचयेऽन्येच कालयवनशाल्वरु-

संपादितफलस्तेन सपक्षः परभेदकः कार्मुकेणेव गुणिना बाणः संधानमेष्यति ९७
येचान्ये कालयवनशाल्वरुक्मिद्रुमादयः तमस्स्वभावास्तेप्येवं प्रदोषमनुयायिनः ९८

क्मिद्रुमादयोराजानः तमः स्वभावास्तमोगुणात्मकाः अतएवतेपिप्रदोषं प्रकृष्टदोषं प्रदोषोदुष्टरात्र्यंशावितिवैजयंती तामसमेनं चैद्यमनुयायिनः अनुयास्यंतिसादृश्यादितिभावः भविष्यतिगम्यादयइतिणिनिर्भविष्यदर्थे अकेनोर्भविष्यदाधमर्ण्ययोरितिषष्ठीप्रतिषेधाद्वितीया यथा ध्वांतं रजनीमुखमनुयातितद्वदितिवस्तुनालंकारध्वनिः राहौ ध्वांतेगुणेतम इत्यमरः ९८ . ७ ७ ७

ननुबाणादयोस्माभिरिदानींकृतसंधानाः नविरोध्यंतीत्यत्राह उपजापइति तेनचैद्येनकृतोत्स्योप्युपजापोभेदः भेदोपजापावुपधाइत्यमरः त्वयि- आकोपवतःप्रकोपवतस्तान् वाणादीन्अनिलः सामीनेधानिवंधनानीव काष्ठेदार्विधनंत्वे धइत्यमरः आशुदीपयितासद्यःप्रज्वलयिष्यति दीपेर्ण्यन्तात्लृट् अंतर्वैरिणःसंहिताः आपदिसनिरंध्रेसद्योविश्लिष्यंतीतिभावः ९९ ततःकिमतआह बृहदितिबृहत्सहायोमहासहायवान् क्षोदीयान् क्षुद्रतरोपि स्थूलदूरेत्यादिनायणादिपरलोपःपूर्वगुणश्च कार्यस्यांतंपारंगच्छति तथाहि अपांसमूहःआपं तस्यसमूहइत्यणादृक्

उपजापःकृतस्तेनतानाकोपवतस्त्वयि आशुदीपयितात्योपिसामीनेधानिवानिलः ९९ बृहत्सहायःकार्यांतं क्षोदीयानपिगच्छति संभूयांभोधिमभ्येतिमहानद्यानगापगा १०० तस्यमित्राण्यमित्रास्तेयेचयेचोभयेनृपाः अभियुक्तंत्वयैनंतेगंतारःस्त्वामतःपरे १०१

गच्छतीत्यापगानगस्यापगागिरिनदीमद्यानद्यागंगादिकयासंभूयमिलित्वाअंभोधि मभ्येति क्षुद्रोप्येवंतादृक्महावीरश्चैद्यस्तुकिमुवक्तव्यंइत्यपिशब्दार्थः विशेषेणसामान्येनसमर्थरूपोर्थांतरन्यासः १०० किंच नकेवलंशत्रोर- साध्यत्वंमित्रविरोधश्चाधिकोनर्थकरइत्याह तस्येत्यादिनाद्वयेन येचतस्यचैद्यस्यमित्राणिनृपाः येचतेनवामित्राः नृपास्तेउभयेत्वयाअभियु क्तमभियानमेनंचैद्यंगंतारोगमिष्यंतिगमेःकर्तरिलुट् अतःपरेउक्तोभयव्यतिरिक्तास्तवमित्राणि स्यामित्राश्चेत्यर्थः त्वांगंतारः १०१ ७

ततः किमत आह मखेति इत्थमनेन प्रकारेण इदमस्य मुरिति थमु प्रत्ययः मखस्य विघ्नाय विघातायसकलराजकं राजसमूहं गोत्रो क्षोट्रोरन्त्रराज
राजन्यपुत्र पुत्रवत्समनुष्याजा द्वुञ् इति वुञ् प्रत्ययः उत्थाप्य क्षोभयित्वा हंतइति खेदे आजातारेरजातशत्रोः युधिष्ठिरस्य त्वया प्रथमेनारिणाजातं अज
नि नपुंसके भविक्तः १०२ अस्तु सोपि शत्रुः कोदोषस्तत्राह संभाव्येति बंधुरेवबांधवः सधर्मराजः अतिभरस्यक्षमः स्कंधोयस्यसः तं समानस्कं
धमित्यर्थः त्वां सहायं संभाव्याभिसंधाय अभिमाप्येति यावत् अध्वरस्य धुरं अध्वरधुरां ऋग्पूरब्धूरित्यादिना समासांतोऽप्रत्ययः समासांतानांम

मखविघ्नाय सकलमित्थमुत्थाप्य राजकं हतजातमजातारेः प्रथमेन त्वयारिणा १०२ युग्मं संभाव्य त्वामतिभरक्षमस्कंधं
सबांधवः सहायमध्वरधुरां धर्मराजो विवक्षते १०३ महात्मानोनुगृण्हंति भजमानान्रिपूनपि सपत्नीः प्रापयंत्यब्धिं सिंध
वोनगनिम्नगाः १०४

प्रकृतिलिंगत्वात्तत्पुरुषे परवल्लिंगत्वे टाप् विवक्षते वोढुमिच्छति वहतेः स्वरितेनः सन्नंतालुट् तथापि विरोधे वि
श्वासघातो बंधुद्रोहश्चेति स्यातामिति भावः विशेषण साम्यादप्रस्तुत युगंधर प्रतीतेः समासोक्तिरलंकारः। १०३ ननु प्रतिश्रुत्याकरणे दोषः प्रागेवपरि-
हारेकोदोषस्तत्राह महात्मानइति महात्मानो भजमानान् शरणागतान् रिपूनप्यनुगृण्हंति किमुत बंधुनिति भावः अत्रार्थांतरं न्यस्यति सिंधवो महानद्यः समा-
न एकः पतिः या सांताः सपत्नीः नित्यं सपत्न्यादिषु इति ङीप् नकारश्च नगनिम्नगाः गिरिनिर्झरिणी अब्धिं प्रापयंति स्वसौभाग्यं ताभ्यः प्रयच्छंतीत्यर्थः अतः
परिहारोप्यनर्ह इति भावः १०४

तर्हिसंप्रतिउपेक्ष्यापिपश्चात्प्रार्थनया पार्थमावर्जयामेत्याह चिरादिति बलिनः प्रबलस्यअरिषुविषये बलात्कारोदंडश्चिरात् चिरकालेनापिस द्योमाभूत् इति भावः सिद्धयेवशंवदत्वसिद्धये भवतीतिशेषः अविमनसोविमनसः संपाद्यमानाः कृताः विमनीकृताः वैमनस्यंप्रापिताइत्यर्थः अरुर्मनश्चक्षुश्चेतोरहोरजसां लो पश्चेतिच्विप्रत्ययेसलोपो अस्यच्वावितीकारः शोभनंहृदयंयेषांतेसुहृदः मित्राणि सुहृद्दुर्हृदौ——मित्रामित्रयोरितिनिपातः छंदस्याभिप्रायस्यानुवृ-त्याचित्तानुरोधेनापिदुःसाध्याः आवर्जयितुमशक्याइत्यर्थः अभिप्रायश्छंदआशयइत्यमरः शत्रुर्दंडेनापि वशगोभवति मित्रंतु वैमनस्येनसाम्नापीत्यर्थः १०५

चिरादपिबलात्कारोबलिनःसिद्धयेरिषु छंदानुवृत्तिदुःसाध्याः सुहृदोविमनीकृताः १०५
मन्यसेरिवधःश्रेयान्प्रीतयेनाकिनामिति पुरोडाशभुजामिष्टमिष्टंकर्तुमलंतरां १०६

ननुसुहृत्कार्यात्सुरकार्यं बलीयइत्यत्राह मन्यसइति नाकिनांदेवानांप्रीतयेऽरिवधः श्रेयान्प्रशस्ततरः प्रशस्यस्यश्रइतिश्रादेशः इतिमन्यसेचेत् तर्हि पुरोडाशभुजां हविर्भोजिनां अतएवनाकिनांइष्टमीप्सितं कर्तुंइषेः कर्मणिक्तः इष्टमिष्टिर्यागइतियावत् यजेर्भावेक्तः वचिस्वपीत्यादिनासंप्रसारणं अलंतरांअतिपर्याप्तं अव्ययात्तरप्प्रत्ययआमागमश्चशत्रुवधादपिप्रियकरोयागइतिनाकिनांभुक्त्वापिशत्रुवधस्यसुकरत्वादितिभावः १०६ ७ ७ ७

तथाप्यमृताशिनां तेषां किमेभिः पिष्टभक्षणैः प्रलोभनैरत आह अमृतमिति अमृतं नाम यत्संतो विद्वांसः मंत्राः एव जिह्वा येषां तेषु मंत्रजिह्वेषु अग्निषु मंत्रजिह्वः सुजिह्वो हव्यवाहन इति वैजयंती यत्पुरोडाशादिकं जुह्वति तदेवेति शेषः यत्तदोर्नित्यसंबंधात् मंदर एव क्षुब्धो मंथनदंडः क्षुब्धस्वांतेत्यादिना तस्मिन्नर्थे निपातनात् सिद्धं तेनक्षुभितस्य मथितस्य अंभोधेर्वर्णना शोभैवालंकार एव अब्धिमंथने नामृतमुत्पादितमिति यत्कीर्तिमात्रं अतो हुतमेवामृतमिति वाक्यार्थयोर्हेतुमद्भावाद्वाक्यार्थहेतुकं काव्य

अमृतं नाम यत्संतो मंत्रजिह्वेषु जुह्वति शोभैव मंदरक्षुब्धक्षुभितांभोधिवर्णना १०७
सहिष्ये शतमागांसि सूनोरुक्त इति यत्त्वया नोपतापि मनः सोष्मवर्गेकावाग्मिनः सतः १०८

लिंगमलंकारः १०७ यात्रायाः कश्चित्प्रतिबंधोपि दुरुत्तरस्तत्रास्तीत्याह सहिष्य इति प्रतीस्यार्ये पूज्यार्ये पूज्यः प्रतीस्यः सांशयिक इत्यमरः पितृष्वस्रेपितृभगिन्ये विभाषास्वसृपत्योरिति विकल्पादलुग्भावः मातृपितृभ्यांस्वसेति षत्वं तेन वत्सूनोः शतमागांस्यपराधान् आगोपराधो मंतुश्चेत्यमरः सहिष्ये सोढाहे इति त्वया यत्प्रतिश्रुतं प्रतिज्ञातं तत्सतीत्त्वं प्रतिपालनीयं अन्यथा महादोषस्मरणादिति भावः १०८ ७ ७ ७ ७

सत्यमस्ति प्रतिश्रुतं किं तस्योन्मत्तत्वादोषइत्यात्तदपि जिहासितमेवेत्यत आह तीक्ष्णेति सतः पुरुषस्य बुद्धिस्तीक्ष्णा निशितास्यादिति विन्द्वीत्यध्याहारः एवमुत्तरत्रापि तथाप्यरुंतुदतीत्यरुंतुदा शस्त्रवन्मर्मच्छेदिनी न भवेत् अतो हिंसयैव परं न पीडयेदित्यर्थः कर्मव्यापारः प्रतापवत् तेजस्वि भयदं स्यात् तथापि शांतं स्यात् न तु हिंस्रादिवद्धिंस्रं भवेदित्यर्थः मनश्चित्तं सोष्मअभिमानोष्णं स्यात् तथाप्युपतापयतीत्युपतापि अग्न्यादिवत्परसंतापि न स्यात् वाग्मिनो वक्तुः सतो वागेका एकरूपा स्यात् वाग्मी सत्यमेव वदेदित्यर्थः अतः सत्यसंधस्य प्रतिश्रुतार्थहानिरनर्हेति भावः अत्र प्रकृतायाः वाचोऽप्रकृतानां बुद्धिकर्ममनसां

तीक्ष्णानारुंतुदा बुद्धिः कर्मशांतं प्रतापवत् नोपतापिमनः सोष्म वागेका वाग्मिनः सतः १०९
स्वयंकृतप्रसादस्य तस्याह्नो भानुमानिव समयावधिमप्राप्य नांतायालं भवानपि ११०

च तुल्यधर्मो दीपम्योगमाद्दीपकालंकारः प्रकृताप्रकृतानां च साम्यं चेत्तुल्यधर्मतः औपम्यं गम्यते यत्र दीपकं तन्निगद्यत इति लक्षणात् बुद्ध्यादीनां शास्त्रादिव्यतिरेकश्चव्यज्यते १०९ अशक्यश्चाकाले चैद्यवध इत्याह स्वयमिति किं च अन्हो भानुमानिव स्वयंकृतः प्रसादोऽनुग्रहः प्रकाशश्च यस्य तस्य चैद्यस्य अंताय समयावधिं नियतकालावसानमप्राप्य भवानपि नालं न शक्तः तथा च तथाश्रमापकीर्तिभ्यां भन्यत् न किंचित्फलमिति भावः ११० ७ ७ ७ ७

तर्हि किमत्यंतोपेक्षैवनेत्याह कृत्वेति किंतु कृत्यविदः कार्यज्ञाः विधिज्ञाश्च प्रणिधीयंतइति प्रणिधयोगूढचारिणः प्रणिधीर्गूढपुरुषइतिहलायुधः तरंत्येभिरितितीर्थानिमंत्राद्यष्टा
दशस्थानानिजलावताराश्च योनौजलावतारेचमंत्राद्यष्टादशस्वपिपुण्यक्षेत्रेतथापात्रेतीर्थंस्यादितिहलायुधः तेष्वंतः पदंस्थानंपाद क्षेपंचकृत्वामहतोदुरवगाहस्यपूज्यस्यच वि
द्विषन्शत्रुरेवांभसृतस्यतलंस्वरूपप्रमाणमितियावत् अधःस्वरूपयोरस्त्रीतलमित्यमरः विदांकुर्वंतुविदंतु विदज्ञानेलोट् विदांकुर्वंत्वित्यन्यतरस्यामितिविकल्पादाम्प्रत्ययांतोनिपा
तः अंभसइवशत्रोः कृततीर्थस्यसुप्रवेशत्वात्स्वागतः प्रविश्यपरीक्ष्येत्यर्थः श्लिष्टपरंपरितरूपकालंकारः १११ आवश्यकंचैतदित्याह अनुत्सूत्रेति उत्सूत्रउच्छास्त्रोनीतिशास्त्रवि
रुद्धः पदन्यासएव पदप्रक्षेपः स्वल्पव्यवहारोपीतियावत् सनास्तियस्यांसाअनुत्सूत्रपदन्यासानीतिपूर्वकसर्वव्यवहारेत्यर्थः अन्यत्र अनुत्सूत्रपदोनाम अनुत्सृष्टसूत्राक्षरः इत्युप

कृत्वाकृत्यविदस्तीर्थेष्वंतःप्रणिधयःपदं विदांकुर्वंतुमहतस्तलंविद्विषदंभसः १११ अनुत्सूत्रपदन्यासासद्वृत्तिःसन्निबंधना शब्द
विद्येवनोभातिराजनीतिरपस्पशा ११२

संख्याननेरपेक्षेणसूत्रास्तैरेवसर्वार्थप्रतिपादकोन्यासोवृत्तिव्याख्यानग्रंथविशेषोयस्यांसातथोक्तासतीयथार्थकल्प
नयाशोभनावृत्तिभृत्यामात्यादीनांजीविकायस्यांसासद्वृत्तिः अन्यत्रसतीवृत्तिः काशिकाख्यसूत्रव्याख्यानग्रंथविशेषोयस्यांसा वृत्तिर्ग्रंथजीवनयोरितिवैजयंती संतिनिबंधना
न्युपजीव्यादीनांक्रियावसानेषुदत्तानिगोणीपणादिशाश्वतिकपारितोषिकदानानियस्यांसा एतच्चदत्वाभूमिनिबंधनंचेत्येतद्वचनंव्याख्यानेमिताक्षरायांद्रष्टव्यं अन्यत्रसन्निबंध
नंभाष्यग्रंथोयस्यांसा एवंभूतापिराजनीतिः राजवृत्तिः अपगतः स्पशोहारोयस्याः साअपस्पशाचेत् यथार्थवर्णोमंत्रज्ञः स्पशोहारकउच्यतइतिहलायुधः अविद्यमानःस्पशः

शास्त्रारंभसमर्थकउपोद्घातग्रंथसंदर्भोयस्याःसाअपस्पशाशब्दविद्याव्याकरणविद्येवसानोभातिनशोभतेतस्माच्चारप्रेषणमावश्यकंतद्रहितस्यराज्ञोऽधप्रायत्वादितिभावःअत्रा
पस्पशेतिजतुकाष्ठवच्छब्दयोरेवश्लिष्टत्वाच्छब्दश्लेषःसद्वृत्तिःसन्निबंधनेत्यत्रैकनालाश्रितबिंबिफलद्वयवदर्थयोरेवश्लिष्टत्वादर्थश्लेषःअनुत्सूत्रपदन्यासेत्यत्रतुउभयसंभवादर्थ
श्लेषःशब्दविद्येवेतिपूर्णोपमाव्यक्तैवतयोःसापेक्षत्वात्संकरः ११२ नकेवलंचारमुखेनपरवृत्तांतज्ञानमपितूपजापश्चकर्तव्यइत्याह अज्ञातेति किंचअज्ञातदोषैःपरैरज्ञातमर्म-
भिःदोषज्ञैःस्वयंपरमर्मज्ञैरभिव्यक्तानिभेद्यस्याग्रेप्रकटितानिशासनानितदमात्याद्यविश्वासकराणिकपटलिखितानियेषांतैरुभयवेतनैरुभयत्रभेदेस्वामिनिचवेतनंवृत्तिर्येषां
तैःउभयत्रजीविकाग्राहिभिर्भेद्यनगरवास्तव्यैश्चवैरिरित्यर्थःभृतयोभर्मवेतनमित्यमरःशत्रोःसंबंधिनःसमवायान्समवयंतीतिसामवायिकाःसंगमुख्याःसन्निवादयःसमवायान्

अज्ञातदोषैर्दोषज्ञैरुदूष्योभयवेतनैः भेद्याःशत्रोरभिव्यक्तशासनैःसामवायिकाः ११३ उपेयिवांसिकर्तारःपुरीमाजातशत्रवीं राजन्य
कान्युपायज्ञैरेकार्थानिचरैस्तव ११४

समवेतीतिठक् उदूष्यद्विषामेतेदत्तहस्ताःअस्माभिरपिएषांलिखितान्येतानिगृहीतानीत्युच्चैर्दूषयित्वाभेद्याःविघट्टनी
याः ११३ उपेयिवांसीति किंच उपायज्ञैःकार्यसाधनकुशलैःतवचरंतीतिचरैर्गूढचारिभिःपचाद्यच् एकार्थानित्वयासहैकप्रयोजनानि राजन्यानांसमूहाराजन्यकानिगो
त्रोक्षेत्यादिनावुञ् अजातशत्रोरिमामाजातशत्रवींपुरीमिंद्रप्रस्थंउपेयिवांसिप्राप्नुवंति उपेयिवाननाश्वाननूचानश्चेतिक्वसुप्रत्ययांतोनिपातःकर्तारःकरिष्यंते कृञःकर्मणि
लुट् इंद्रप्रस्थेअस्माकंमहद्राज्यकार्यंभविष्यतितदध्वरयात्राव्याजेनसन्नद्धैरागंतव्यंइतिगूढंसंदिश्यतत्रसर्वैर्मेलयितव्याइत्यर्थः ११४ ७ ७

ननु तत्राध्वरकर्मणि को युद्धावकाशः इत्याशंक्य तत्रैव महत्कलहबीजं संपादयति सविशेषमिति पांडोः सुते युधिष्ठिरे भवति पूज्येत्यर्थे सविशेषे यथा तथा भक्तिं वितन्वति सति तत्रत्यास्त्वपक्षा मत्सरिणो द्वेषवंतः परे शत्रवः स्वयमेव वैरायितारः वैरं कर्तारः शब्दवैरकलहाभ्रकण्वमेघेभ्यः करण इति क्यङ् ततः कर्तरि लुट् ११५ किं ते सर्वे वैरायिष्यंते नेत्याह यदिति इह विपक्षमध्ये शत्रुमध्ये सह संवृद्धिं युजोपि चैद्ये येन सह ऐश्वर्यं गता अपि सत्सूहिषेत्यादिना क्विप् ये भूभुजो राजानः आत्मविदः स्वाभिजनवेदिनः स्युः तैर्भूभुग्भिर्बलिपुष्टकुलात् काककुलात् काके तु करटारिष्टबलिपुष्टसकृत्प्रजा इत्यमरः अन्यपुष्टैः परभृतैरिव कोकिलैरिवाचिरेण सद्यः अस्माद्विपक्षमध्यात् अन्यारादित्यत्रान्यशब्दस्यार्थपरत्वात्पृथगादियोगेपि पंचमी पृथग्भाविता पृथग्भूतैर्भविष्यते भावे लिट् चिण्वदिविद्धिः तेष्वपि केचिदस्माभिः संगच्छंत इत्यर्थः औपच्छंदसिकं वृत्तं ११६ अथ फलितं निगमयन्नाशिषं प्रयुंक्ते सहजेति सहजं स्वाभाविकं चापलं दुर्विनीतत्वं अनवस्थितत्वं च चपलः पारदे शीघ्रे दुर्विनीतेनवस्थित इति वैजयंती तेनैव दोषेण समुद्धतः दृप्तः पक्षः सहायो गरुच्च पक्षः पार्श्वगरुत्साध्यसहाय बलभित्तिषिति वैजयंती चलितः अस्थिरः दुर्बलपक्षपरिग्रहो यस्य स असुहृद्गणः शत्रुवर्गः तवदुरासदे वीर्यविभावसौ दुःसहतेजोवन्हौ वीर्यं शक्ते प्रभावे च तेजः सामर्थ्ययोरपि सूर्यवन्हीविभावसू इति विश्वामरौ शलभतां पतंगत्वं समोपतंगशलभौ इत्यमरः लभतां गच्छतु रूपकालंकारः द्रुतविलंबितं वृत्तं ११७

सविशेषं कृते पांडोर्भक्तिं भवति तन्वति वैरायितारस्तत्रत्याः स्वयं मत्सरिणः परे ११५ यइहात्मविदो विपक्षमध्ये सहसंवृद्धियुजोपि भूभुजः स्युः बलिपुष्टकुलादिवान्यपुष्टैः पृथगस्मादचिरेण भाविताते ११६ सहजचापलदोषसमुद्धतश्चलितदुर्बलपक्षपरिग्रहः तवदुरासदवीर्यविभावसौ शलभतां लभतामसुहृद्गणः ११७

इतीति सहरिः इतीत्थंविशकलितार्थांविवेचितार्थामनुगतनयमार्गांनीतिमार्गानुसारिणींदुर्नयनस्यबलभद्राद्युक्तस्येतिभावः अर्गलांनिवारयित्रीं इतिवैधर्म्येण रूपका लंकारः तद्विष्कंभोर्गलंननेसमरः अतएवजनितमुदं हरेःकृतानंदांउच्छ्रितेउन्नतेउरस्थलेनियतंन्निषण्णयानित्यंविश्रांतयाश्रियाश्रुतांनान्येनेतिमंत्रगुप्तिःउद्धव्य स्येमामौद्धवींएनांपूर्वोक्तांवाचंशुश्रुवान् भाषायांसदवसश्रुवइतिकसुप्रत्ययः उच्चैरेवोच्चकैरुन्नतःसन् अव्ययसर्वनाम्नामकच्प्राक्टेरित्यकच्प्रत्ययः उदस्थादास

इतिविशकलितार्थामौद्धवींवाचमेनामनुगतनयमार्गामर्गलांदुर्नयस्य जनितमुदमुदस्थादुच्चकैरुच्छ्रितोरःस्थलनियत
निषण्णश्रीश्रुतांशुश्रुवान्सः ११८ इतिश्रीमाघकाव्येशिशुपालवधेद्वितीयःसर्गःसमाप्तः ॥

नादुत्थितवान् ऊर्दोनूर्ध्वकर्मणीत्यस्य प्रत्युदाहरणमेतत् रूपकानुप्रासावलंकारौ मालिनीवृत्तं इतिश्रीपदवाक्यप्रमाणपारावारपारीणश्रीमन्महोपाध्यायकोलाचल मल्लिनाथसूरिविरचितेमाघकाव्यव्याख्यानेसर्वंकषाख्ये द्वितीयःसर्गःसमाप्तिमगमत् ॥ ११८ ॥ ॥ युग्मांकसप्तभूशाके १७९२ ओढमच्याख्यपत्तने ॥ खांडेक रोपाह्वयेन वासुदेवांगजेनवै ॥ काशीनाथाभिधेनायं यंत्रेनीतिप्रकाशके ॥ मासेनभसिपंचम्यामंकितः कृशिलाक्षरैः ॥ ॥ ॥

इतिमाघकाव्येद्वितीयःसर्गःसमाप्तः

[OrderDescription]
,CREATED=30.11.19 14:36
,TRANSFERRED=2019/11/30 at 14:43:46
,PAGES=58
,TYPE=STD
,NAME=S0002227
,Book Name=M-293-MADH KAVYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,